॥ श्रीजिनाय नमः ॥

ान्वयं गूर्जरभाषांतरसहितं च )

# ॥ श्रीद्विपृष्ठवासुदेव चरित्रं ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय सहित भाषांतर करनार तथा छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज.

( आ ग्रंथना अन्वय तथा भाषांतरना प्रसिद्ध कर्ताए सर्व हक स्वाधिन राख्या छे )

विक्रम संवत् १९८४ किमत रु. १-८-० सने १९२९

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ श्रीजिनाय नमः ॥
( श्रीचारित्रविजयगुरुभ्यो नमः )
( सान्वयं गूर्जरभाषांतरसहितं च )

## ॥ अथ श्रीद्विपृष्टवासुदेव चरित्रं प्रारभ्यते ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय तथा गुजराती भाषांतर कर्ता—पंडित श्रावक हीरालाल हंसराज—जामनगरवाळा

इतश्चारितृणस्तोमे वेगं पवनवद्वहन् । नाम्ना पवनवेगोऽभूद् भूपः पृथ्वीपुरे पुरे ॥ १ ॥

अन्वयः—इतश्च अरि तृण स्तोमे पवनवत् वेगं वहन् पृथ्वीपुरे पुरे पवनवेगः नाम्ना भूपः अभूत्. ॥ १ ॥

अर्थः—हवे शत्रुओरूपी तृणोनो समूह उडाडी देवामां वायुनीपेठे वेगने धारण करनारो पृथ्वीपुरनामना नगरमां पवनवेगनामे राजा हतो. ॥ १ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

**अखण्डसुकृतः खण्डमिलायाः परिपालयन् । मित्राणामप्यमित्राणामप्यानन्दमदत्त सः ॥ २ ॥**

अन्वयः—अखंड सुकृतः सः इलायाः खंडं परिपालयन् मित्राणां अपि, अमित्राणां अपि आनंदं अदत्त. ॥ २ ॥

अर्थः—अखंड पुण्यशाली एवो ते राजा, पृथ्वीखंडनुं पालन करतोथको मित्रोने तथा शत्रुओने पण आनंद आपवा लाग्यो.

**समये व्रतमादाय मुनेः श्रमणसिंहतः । तप्त्वा तीव्रं तपः प्राप स विमानमनुत्तरम् ॥ ३ ॥**

अन्वयः—समये श्रमणसिंहतः मुनेः व्रतं आदाय, तीव्रं तपः तप्त्वा सः अनुत्तरं विमानं प्राप. ॥ ३ ॥

अर्थः—समय आव्ये श्रमणसिंह नामना मुनिपासे चारित्र लेइने, तथा आकरो तप तपीने ते अनुत्तरविमानमां गयो. ॥ ३ ॥

**इतश्च निश्चलश्रीकं जम्बूद्वीपविभूषणे । दक्षिणे भरतार्धेऽस्मिन्नस्ति विन्ध्यपुरं पुरम् ॥ ४ ॥**

अन्वयः—इतश्च जंबूद्वीप विभूषणे अस्मिन् दक्षिणे भरतार्धे निश्चल श्रीकं विंध्यपुरं पुरं अस्ति. ॥ ४ ॥

अर्थः—हवे जंबूद्वीपना आभूषणसरखा आ दक्षिण भरतार्धमां निश्चल लक्ष्मीवाळुं विंध्यपुरनामनुं नगर छे. ॥ ४ ॥

**अवन्ध्यशक्तिस्तत्राभूद्विन्ध्यशक्तिरिति प्रभुः । चापं यस्मिन्विशद्विश्वजयश्रीद्वारतां दधौ ॥ ५ ॥**

अन्वयः—तत्र अवंध्य शक्तिः विंध्यशक्तिः इति प्रभुः अभूत्, यस्मिन् विशत् जय श्री द्वारतां चापं दधौ. ॥ ५ ॥

अर्थः—त्यां सफल शक्तिवाळो विंध्यशक्तिनामे राजा हतो, के जेनुं धनुष् प्रवेश करती विजयलक्ष्मीना दरवाजापणाने धारण

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

करतुं हतुं. ॥ ५ ॥

गम्भीरनीरभ्रमतो यत्प्रतापभरातुराः । उपेत्य यत्कृपाणान्तर्नृपाणां ततयोऽपतन् ॥ ६ ॥

अन्वयः–यत्प्रताप भर आतुराः नृपाणां ततयः, यत् कृपाणांतः गंभीरं नीर भ्रमतः उपेत्य अपतन्. ॥ ६ ॥

अर्थः—जेना प्रतापना समूहथी पीडित थयेली राजाओनी श्रेणिओ, जेनी तलवारनी अंदर जलनी भ्रांतिथी आवीने पडती हती.

रणनश्यदरिश्रेणित्वराभरतिरस्कृतैः । व्यराजि वाजिभिर्यस्य ह्रियेव विनमन्मुखैः ॥ ७ ॥

अन्वयः–रण नश्यत् अरिश्रेणि त्वरा भर तिरस्कृतैः, ह्रिया इव विनमत् मुखैः यस्य वाजिभिः व्यराजि. ॥ ७ ॥

अर्थः–रणसंग्राममांथी नाशी जता शत्रुओना वेगना समूहथी तिरस्कार पामेला, अने तेथी जाणे लज्जावडे नमी जता मुखोवाळा जेना घोडाओ शोभता हता. ॥ ७ ॥

अमुं कदाचिदास्थानिस्थितं वेत्रिनिवेदितः । समुपेत्य चरः कश्चिन्नरनाथमजिज्ञपत् ॥ ८ ॥

अन्वयः–कदाचित् आस्थानी स्थितं अमुं नरनाथं वेत्रि निवेदितः कश्चित् चरः समुपेत्य अजिज्ञपत्. ॥ ८ ॥

अर्थः–कोइक दिवसे सभामां बेठेला ते राजाने छडीदारे निवेदन करेलो कोइक दूत पासे आवीने कहेवा लाग्यो के, ॥ ८ ॥

इहैव भरतार्धेऽस्ति नाथ जानासि विश्रुतम् । जातं भूपुण्यपाकेन साकेतमिति पत्तनम् ॥ ९ ॥



P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

अन्वयः-(हे) नाथ! जानासि, इह एव भरतार्ध भू पुण्य पाकेन जातं साकेतं इति विश्रुतं पत्तनं अस्ति. ॥ ९ ॥

अर्थः-हे स्वामी! आप जाणो छोके, आज भरतार्धमां, जाणे पृथ्वीना पुण्यना उदयथी उत्पन्न थयेलुं, साकेतनामनुं मख्यात नगर छे. ॥ ९ ॥

**तत्रास्ति राजा शौर्यश्रीकेलिजङ्गमपर्वतः । पर्वतो नाम संग्रामयशःप्रसरनिर्झरः ॥ १० ॥**

अन्वयः-तत्र संग्राम यशः मसर निर्झरः, शौर्य श्री केलि जंगम पर्वतः पर्वतः नाम राजा अस्ति. ॥ १० ॥

अर्थः-ते नगरमां संग्राममां मळेला यशना विस्ताररूपी झरणाओवाळो, अने शौर्य लक्ष्मीने क्रीडा करवाना जंगम पर्वत सरखो पर्वत नामे राजा छे. ॥ १० ॥

**यममृत्युद्वयीधारः कालो यत्खड्गतां दध । स्वेच्छया हन्त हन्त्येव हन्तव्यानहतोदयः ॥ ११ ॥**

अन्वयः-यम मृत्यु द्वयी धारः कालः यत् खड्गतां दधत्, अहत उदयः हंत हंतव्यान् स्वेच्छया हंति एव. ॥ ११ ॥

अर्थः-यम अने मृत्युरूपी बे धारवाळो काल, जे राजाना खड्गपणाने धारण करीने, अटकाव रहित उदयवाळो थयो थको हणवालायक शत्रुओने स्वेच्छापूर्वक हणेज छे. ॥ ११ ॥

**रजोभिरश्वपादोत्थैर्गजोत्थैश्च मदाम्बुभिः । यत्सेना भाति संहारसृष्टिकृद्वारिधेरपि ॥ १२ ॥**

अन्वयः-यत् सेना अश्व पाद उत्थैः रजोभिः, च गजोत्थैः मद अंबुभिः वारिधेः अपि संहार सृष्टिकृत् भाति. ॥ १२ ॥

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

अर्थः—जेनी सेना घोडाओना पगोथी उडेली रजवडे, तथा हाथीओना झरता मदजलवडे महासागरनो पण (अनुक्रमे) विनाश अने उत्पत्ति करतीथकी शोभे छे. ॥ १२ ॥

**राज्यश्रीभाग्यसारं तं दृशैव भृशमीदृशम् । दीनयन्ती प्रिया तस्य वेश्यास्ति गुणमञ्जरी ॥ १३ ॥**

अन्वयः—राज्य श्री भाग्य सारं ईदृशं तं दृशा एव भृशं दीनयंती गुणमंजरी वेश्या तस्य प्रिया अस्ति. ॥ १३ ॥

अर्थः—राज्यलक्ष्मीना भाग्यथी उत्तम एवा पण ते राजाने, फक्त चक्षुना कटाक्षथीज अत्यंत घायल करती, एवी गुणमंजरीनामनी वेश्या तेने प्रिय छे. ॥ १३ ॥

**यां विधाय विधिः पाणी क्षालयामास वारिधौ । तन्मलं तत्र जानामि नानामणिगणच्छलात् ॥ १४ ॥**

अन्वयः—यां विधाय विधिः वारिधौ पाणी क्षालयामास, तत्र नाना मणि गण च्छलात् तन्मलं, जानामि. ॥ १४ ॥

अर्थः—जेणीने बनावीने ब्रह्माए महासागरमां पोताना हाथ धोया छे, अने ते महासागरमां विविध प्रकारना मणिओना समूहना मिषथी तेनो मेल पडेलो छे, एम हुं जाणुं छुं. ॥ १४ ॥

**ईहन्ते हन्त यत्कान्तिविलोकस्मितविस्मयाः । अपि दिक्पतयः सर्वे पर्वतीभावमात्मनि ॥ १५ ॥**

अन्वयः—हंत यत्कांति विलोक स्मित विस्मयाः सर्वे दिक् पतयः अपि आत्मनि पर्वतीभावं इहंते. ॥ १५ ॥

अर्थः—अहो! जेनी कांतिने जोवाथी आश्चर्य पामेला सघळा दिक्पालो पण पोतानेविषे पर्वतपणाने (निश्चलपणाने) इच्छे छे.

P.P. Ac. Gunratnasuri M.S.	Jun Gun Aaradhak Trust

निर्दम्भतत्परीरम्भसंभवत्पुलका मुदम् । तदलंकारसाराधिष्ठानदेव्योऽपि बिभ्रति ॥ १६ ॥

अन्वयः—निर्दंभ तत् परीरंभ संभवत् पुलकाः, तत् अलंकार सार अधिष्ठान देव्यः अपि मुदं बिभ्रति. ॥ १६ ॥

अर्थः—कपटरहित एवां तेणीना आलिंगनथी रोमांचित थयेली, तेणीना मनोहर आभूषणोनी अधिष्ठायिका देवीओ पण आनंद पामे छे. ॥ १६ ॥

तथैव कान्तया देव त्वत्तः पर्वतकोऽधिकः । श्रिया सैन्येन रूपाद्यैर्गुणैस्तु त्वं ततोऽधिकः ॥ १७ ॥

अन्वयः-(हे) देव! तया कांतया एव पर्वतकः त्वत्तः अधिकः, तु श्रिया सैन्येन रूप आद्यैः गुणैः त्वं ततः अधिकः. ॥ १७ ॥

अर्थ.—हे स्वामी! ते स्त्रीथीज ते पर्वतराजा तमाराथी चडीयातो छे, परंतु लक्ष्मी, सैन्य, अने रूप आदिक गुणोवडे तो तमो तेनाथी चडीयाता छो. ॥ १७ ॥

तयातीव भवान्भाति भवतातीव भाति सा । पृथग्भावेन भवतोर्न श्रीरिन्दुनिशोरिव ॥ १८ ॥

अन्वयः-तया भवान् अतीव भाति, सा भवता अतीव भाति, इन्दु निशोः इव भवतोः पृथग्भावेन श्रीः न. ॥ १८ ॥

अर्थ.—तेणीथी तमो अत्यंत शोभो एम छो, अने ते तमाराथी अत्यंत शोभे एम छे, परंतु चंद्र अने रात्रिनीपेठे तमो बन्नेवच्चेनी (ज्यांसुधी) जूदाइ छे, (त्यांसुधी) शोभा थाय तेम नथी. ॥ १८ ॥

नरेन्द्रवृन्दवन्द्योऽसि स्वामिन् शक्त्या कयापि तत् । सर्पादिव मणिं तस्मात्तां ग्रहीतुं भवोद्यतः ॥१९॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अन्वयः-(हे) स्वामिन्! नरेंद्र वृंद वंद्यः असि, तत् कया अपि शक्त्या, सर्पात् मणिं इव, तस्मात् तां ग्रहीतुं उद्यतः भव?

अर्थः—हे स्वामी! आप तो राजाओना समूहोने नमवालायक छो, माटे कोइ पण शक्तिथी सर्पपासेथी मणिनीपेठे तेनीपासेथी तेणीने लेवाने प्रयत्नवान थाओ? ॥ १९ ॥

**इति श्रुत्वाथ हृष्टेन तं सन्मान्य महीभुजा। दौत्याय प्रहितो मन्त्री सभान्तः पर्वतं जगौ ॥ २० ॥**

अन्वयः-अथ इति श्रुत्वा हृष्टेन महीभुजा तं सन्मान्य दौत्याय प्रहितः मंत्री सभांतः पर्वतं जगौ. ॥ २० ॥

अर्थः—पछी एम सांभळीने खुशी थयेला ते विंध्यशक्तिराजाए तेनो सत्कार करीने, ते (स्त्री मेळववानी) विष्टिमाटे मोकलेलो मंत्री सभानी अंदर बेठेला ते पर्वतराजाने कहेवा लाग्यो के, ॥ २० ॥

**कालकूटममित्राणां मित्राणां तु सुधारसः। विन्ध्यशक्तिर्ब्रवीति त्वां मन्मुखेन सखा तव ॥ २१ ॥**

अन्वयः-अमित्राणां कालकूटं, मित्राणां तु सुधा रसः, तव सखा विंध्यशक्तिः मन्मुखेन त्वां ब्रवीति. ॥ २१ ॥

अर्थः—शत्रुओने झेरसमान, तथा मित्रोने अमृतरससमान तमारा मित्र विंध्यशक्तिराजा मारां मुखथी तमोने कहेवरावे छे के,

**यस्ते वैरी स मे वैरी यः सुहृन्मे स ते सुहृत्। या ते श्रीः सा ममापि श्रीर्या मे भूः सा तवापि भूः**

अन्वयः-यः ते वैरी, स मे वैरी, यः मे सुहृत्, स ते सुहृत्, या ते श्रीः, सा मम अपि श्रीः, या मे भूः, सा तव अपि भूः.

अर्थः—जे तमारो शत्रु, ते मारो पण शत्रु, जे मारो मित्र, ते तमारो पण मित्र, जे तमारी लक्ष्मी, ते मारी पण लक्ष्मी, अने



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जे मारी भूमि, ते तमारी पण भूमि छे. ॥ २२ ॥

**एवं सौहार्दसंबन्धभासमानैकभावयोः । नैव श्रियि क्रियायां वा विभेदो भृशमावयोः ॥ २३ ॥**

अन्वयः—एवं सौहार्द संबंध भासमान एक भावयोः आवयोः श्रियि क्रियायां वा भृशं विभेदः न एव. ॥ २३ ॥

अर्थः—एरीते मित्राइना संबंधथी शोभती ऐक्यतावाळा आपण बन्ने वच्चे लक्ष्मी अथवा कार्यना संबंधमां पण विलकुल जूदाइ नथीज. ॥ २३ ॥

**भेदं यदि न देहेऽपि धत्से तच्छेमुषीप्रिय । मह्यं प्रेषय वेगेन गणिकां गुणमञ्जरीम् ॥ २४ ॥**

अन्वयः—(हे) तत् शेमुषी प्रिय! यदि देहे अपि भेदं न धत्से, मह्यं वेगेन गुणमंजरीं गणिकां प्रेषय? ॥ २४ ॥

अर्थः—तेवी रीतनीज बुद्धिथी प्रिय एवा हे पर्वतमित्र! जो (आपण बन्नेनां) शरीरमां पण तमो जूदाइ न राखता हो तो, मने (जरा पण) विलंवविना ते गुणमंजरी वेश्याने मोकली आपो? ॥ २४ ॥

**इत्यस्य वचसा दीप्तः पवनेनेव पावकः । ततान पर्वतस्तीव्रामक्षरालिं स्फुलिङ्गवत् ॥ २५ ॥**

अन्वयः—इति अस्य वचसा, पवनेन पावकः इव, पर्वतः स्फुलिंगवत् तीव्रां अक्षर आलिं ततान. ॥ २५ ॥

अर्थः—एवीरीतनां तेनां वचनथी वायुथी जेम अग्नि, तेम ते पर्वतराजा तणखाओसरखी तीव्र अक्षरोनी श्रेणि विस्तारवा लाग्यो.

**साधु सख्यं चिरादद्य दर्शितं विन्ध्यशक्तिना । याचिता जीवितव्यं मे यदसौ गुणमञ्जरी ॥ २६ ॥**



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

अन्ववः—अद्य विंध्यशक्तिना चिरात् सख्यं साधु दर्शितं, यत् मे जीवितव्यं असौ गुणमंजरी याचिता. ॥ २६ ॥

अर्थः—आजे विंध्यशक्तिए घणे काळे मित्राइ तो सारी देखाडी! केमके मारां जीवनसरखी आ गुणमंजरीनी तेणे मागणी करी.

**स्वमुखेनैव यद्येतदभणिष्यत्स मे पुरः । अदास्यमुत्तरं तस्य स्वकृपाणमुखेन तत् ॥ २७ ॥**

अन्वयः—यदि सः मे पुरः स्व मुखेन एव एतत् अभणिष्यत्, तत् तस्य स्व कृपाण मुखेन उत्तरं अदास्यं. ॥ २७ ॥

अर्थः—कदाच तेणे मारीपासे पाताना मुखथीज आ हकीकत कही होत, तो तेने मारी तलवारनी अणीथीज उत्तर आपत.

**क्रोधाग्निर्वर्धमानो मे धक्ष्यति त्वामपि ध्रुवम् । तत्तूर्णं गच्छ मा यच्छ दूतदारणदुर्यशः ॥ २८ ॥**

अन्वयः—मे वर्धमानः क्रोध अग्निः त्वां अपि ध्रुवं धक्ष्यति, तत् तूर्णं गच्छ! दूत दारण दुर्यशः मा यच्छ? ॥ २८ ॥

अर्थः—मारो वृद्धि पामतो क्रोधरूपी अग्नि तने पण खरेखर बाळी नाखशे, माटे तुं तुरत चाल्यो जा? अने दूतने मारीनाखवानो अपजश मने नही आप? ॥ २८ ॥

**इति कोपिनि भूपेऽसौ वण्ठैः कण्ठे धृतः पुमान् । अपमानात्समधिकं गत्वाख्यद्विन्ध्यशक्तये ॥ २९ ॥**

अन्वयः—इति भूपे कोपिनि वंठैः कंठे धृतः असौ पुमान्, गत्वा अपमानात् समधिकं विंध्यशक्तये आख्यत्. ॥ २९ ॥

अर्थः—एरीते ते राजा कोपायमान थवाथी लुच्चा नोकरोए गळुं पकडीने (कहाडी मेलेला) ते दूते (त्यांथी) निकळीने ते अपमानथी पण अधिक वर्णन ते विंध्यशक्तिराजाने कही संभळाव्युं. ॥ २९ ॥

तदैव दैवमप्याशु दुर्बलं गणयन्बलात् । चक्रे प्रयाणं राजासौ रजसावरितांम्बरम् ॥ ३० ॥

अन्वयः—बलात् दैवं अपि आशु दुर्बलं गणयन् असौ राजा तदा एव रजसा आवरित अंबरं प्रयाणं चक्रे. ॥ ३० ॥

अर्थः—पछी बलथी दैवने पण तुरत दुर्बल गणतो एवो ते राजा ते समये धूलिथी आकाशने आच्छादित करनारुं (त्यांथी) प्रयाण करवा लाग्यो. ॥ ३० ॥

पर्वतोऽपि चमूचारचूर्णीभूताध्वपर्वतः । प्रतिप्रयाणमकरोद्धैर्याब्धिमकरो रयात् ॥ ३१ ॥

अन्वयः—चमू चार चूर्णीभूत अध्व पर्वतः, धैर्य अब्धि मकरः पर्वतः अपि रयात् प्रतिप्रयाणं अकरोत्. ॥ ३१ ॥

अर्थः—पछी सैन्यना प्रयाणथी चूरेचूरा थइ गया छे पर्वतो जेनाथी, अने धैर्यरूपी महासागरमां मगरसरखा ते पर्वतराजाए पण वेगथी तेनी सामे प्रयाण कर्युं. ॥ ३१ ॥

चलद्भिः केतुचीराग्रैस्तर्जयन्तौ मिथोऽप्यथ । योद्धुमुत्सङ्गितोत्साहौ तौ सैन्याब्धी समीयतुः ॥ ३२ ॥

अन्वयः—अथ चलद्भिः केतु चीर अग्रैः मिथः अपि तर्जयंतौ, उत्संगित उत्साहौ तौ सैन्य अब्धी योध्धुं समीयतुः. ॥ ३२ ॥

अर्थः—पछी उडती धजाओना वस्त्रोना अग्र भागोथी परस्पर तिरस्कार करता, अने अति उत्साहमां आवेला, ते बन्ने सैन्यो-रूपी समुद्रो युद्ध माटे आवी पहोंच्यां. ॥ ३२ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अजातजयभङ्गानि क्षणं क्षोणिपयोस्तयोः । अश्वेभरथपत्तीनां द्वन्द्वयुद्धानि जज्ञिरे ॥ ३३ ॥

अन्वयः-क्षणं तयोः क्षोणि पतयोः अजात जय भंगानि, अश्व इभ रथ पत्तीनां द्वंद्व युद्धानि जज्ञिरे. ॥ ३३॥

अर्थः-पछी क्षण वारसुधी ते बन्ने राजाओनां हारजीतविनानां घोडा, हाथी, रथ, तथा पायदळनां द्वंद्वयुद्धो थयां. ॥ ३३ ॥

चिरेप्सितायां समरश्रियि संजातसंगतौ । अदर्शि क्षतजं वीरैश्चिरसंचितरागवत् ॥ ३४ ॥

अन्वयः-चिर इप्सितायां समर श्रियि संजात संगतौ वीरैः चिर संचित रागवत् क्षतजं अदर्शि. ॥ ३४ ॥

अर्थः-घणा काळथी इच्छेली संग्रामलक्ष्मीनो समागम थतां शूरवीरोए घणा काळथी एकठा करेला रागसरखुं रुधिर देखाडी आप्युं.

शरीरैर्वैरिवाराणामभ्युत्पत्य मुहुर्मुहुः । प्रहाराणां गणः काममापतन्कवलीकृतः ॥ ३५ ॥

अन्वयः—वीर वाराणां शरीरैः मुहुः मुहुः अभ्युत्पत्य प्रहाराणां आपतन् गणः कामं कवलीकृतः. ॥ ३५ ॥

अर्थः—शूरवीरोना समूहोना शरीरोए वारंवार सामे उछळीने प्रहारोना आवी पडता समूहने खुशीथी कोळीआरूप करी लीधो, अर्थात् झीलीने सहन कर्यो. ॥ ३५ ॥

अन्येष्वपि द्विषद्वारप्रहारान्परिपातिनः । स्वस्मिन्नेव भटा ऐच्छँल्लुब्धा इव धनोच्चयान् ॥ ३६ ॥

अन्वयः-लुब्धाः धनोच्चयान् इव, अन्येषु परिपातिनः द्विषत् वार प्रहारान् अपि भटाः स्वस्मिन् एव ऐच्छन्. ॥ ३६ ॥

अर्थः—लोभी माणसो जेम धनना समूहोने इच्छे, तेम बीजाओपर पडता शत्रुसमूहना प्रहारोने पण शूरवीरो पोतापर पडे तो



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ठीक, एम इच्छवा लाग्या. ॥ ३६ ॥

**अपसृत्यापसृत्याशु प्रधावद्भिर्विरोधिषु । वीरैर्जयश्रियोऽपूरि दोलाकेलिकुतूहलम् ॥ ३७ ॥**

अन्वयः—अपसृत्य अपसृत्य आशु विरोधिषु प्रधावद्भिः वीरैः जय श्रियः दोला केलि कुतूहलं अपूरि. ॥ ३७ ॥

अर्थः—पाछा हठीने हठीने एकदम शत्रुओपर त्रुटी पडता शूरवीरो जयलक्ष्मीनी हींडोलापर झूलवानी क्रीडाना कुतुहलने संपूर्ण करवा लाग्या. ॥ ३७ ॥

**तुल्य एव प्रबलयोरित्यभूद्बलयोर्जयः । बाह्वोर्बाहुधनस्येव मिथः संधृत्य कर्षतोः ३८ ॥**

अन्वयः—बाहु धनस्य मिथः संधृत्य कर्षतोः बाह्वोः इव, प्रबलयोः बलयोः इति तुल्यः एव जयः अभूत्. ॥ ३८ ॥

अर्थः—बाहुबलने धारण करनारा योद्धाना परस्पर पकडीने खेंचाता बन्ने हाथनीपेठे ते बन्ने बलवान सैन्योनो एरीते सरखोज विजय थयो. ॥ ३८ ॥

**गर्वात्सर्वाभिसारेण प्रतेने पर्वतस्ततः । उत्तिष्ठमानो मानोर्मिमुक्तमेवारिवारिधिम् ॥ ३९ ॥**

अन्वयः—ततः गर्वात् सर्व अभिसारेण उत्तिष्ठमानः पर्वतः अरि वारिधिं मान ऊर्मि मुक्तं एव प्रतेने. ॥ ३९ ॥

अर्थः—पछी गर्वथी सर्व प्रकारना धसाराथी उठेला पर्वत राजाए शत्रुओरूपी महासागरने अभिमानरूपी मोजांओथी रहित कर्यो.

**रेजेऽस्त्रैः खण्डशः कुर्वन्वैरिवीरान्पशूनिव । तेजोऽग्निं ज्वालयन्कालः स्वयंपाकव्रतीव सः ॥ ४० ॥**



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अन्वयः–तेजः अग्निं ज्वालयन् स्वयंपाक व्रती कालः इव, सः अस्त्रैः पशून् इव वैरि वीरान् खंडशः कुर्वन्‌रेजे. ॥ ४१ ॥

अर्थः–तेजरूपी अग्निने बालता स्वयंपाक व्रतवाळा कालनीपेठे ते पर्वतराजा शस्त्रोवडे पशुओनीपेठे शत्रुओना सुभटोना टुकडे-टुकडा करतोथको शोभवा लाग्यो. ॥ ४१ ॥

**कुर्वन्संकीर्णकीनाशवदनं कदनं द्विषाम् । अधावत ततः क्रुद्धो युद्धोर्व्यां विन्ध्यराडपि ॥ ४२ ॥**

अन्वयः—ततः संकीर्ण कीनाश वदनं द्विषां कदनं कुर्वन् क्रुद्धः विंध्यराट् अपि युद्ध उर्व्यां अधावत. ॥ ४२ ॥

अर्थः–पछी जेथी यमराजना मुखमां पण संकडामण थाय, एवो शत्रुओनो संहार करतोथको क्रोध पामेलो विंध्यराजा पण युद्धभू-मिमां दोडी आव्यो. ॥ ४२ ॥

**मिथः प्रमथिताशेषबलौ प्रबलदोर्बलौ । तर्जयन्तौ भ्रुवैवैतौ गर्जन्तावभिजग्मतुः ॥ ४३ ॥**

अन्वयः—प्रमथित अशेष बलौ, प्रबल दोर्बलौ, भ्रुवा एव मिथः तर्जयंतौ एतौ गर्जंतौ अभिजग्मतुः. ॥ ४३ ॥

अर्थः—कचरी नाखेल छे सर्व सैन्य जेओए एवा, प्रचंड भुजबलवाळा, तथा भ्रुकुटिथीज परस्पर एक बीजानो तिरस्कार कर-नारा, ते बन्ने राजाओ गर्जना करताथका सामसामे आवी गया. ॥ ४४ ॥

**रथसारथिरथ्यानां मिथो मन्थममन्थरम् । प्रथयित्वा स्थितौ पृथ्व्यां पृथू पृथ्वीधरौ यथा ॥ ४४ ॥**

अन्वयः—यथा पृथू पृथ्वीधरौ, (तथा तौ) मिथः रथ सारथि रथ्यानां अमंथरं मंथं प्रथयित्वा पृथ्व्यां स्थितौ. ॥ ४५ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—पछी बे महान् पर्वतोनीपेठे तेओ बन्ने परस्पर रथ, सारथि तथा घोडाओनो घणो कच्चरघाण वाळीने जमीन पर आवीने उभा. ॥ ४४ ॥

**रथान्तरपरिस्पन्दावमन्दानन्दविक्रमौ । युयुधाते क्रुधा तेजस्तेजयन्तौ जयाय तौ ॥ ४५ ॥**

अन्वयः–रथ अंतर परिस्पंदौ, अमंद आनंद विक्रमौ, क्रुधा तेजः तेजयंतौ तौ जयाय युयुधाते. ॥ ४५ ॥

अर्थः—बीजा रथमां बेठेला, तथा अति आनंदयुक्त पराक्रमवाळा, अने क्रोधथी तेजने वधारता एवा तेओ बन्ने विजय माटे लडवा ॥ ४५ ॥

**युक्तं पर्वतको विन्ध्यशक्तिना युधि निर्जितः । चित्रं पलायमानोऽपि स जिगाय प्रभञ्जनम् ॥ ४६ ॥**

अन्वयः–विंध्यशक्तिना युधि पर्वतकः निर्जितः युक्तं, चित्रं पलायमानः अपि सः प्रभंजनं जिगाय. ॥ ४६ ॥

अर्थः—विंध्यशक्ति राजाए युद्धमां ते पर्वतने जे जीत्यो, ते युक्तज छे, परंतु आश्चर्यनी विना तो एछे के, (त्यांथी) नाशता एवा तेणे वायुने पण जीती लीधो! ॥ ४६ ॥

**जगृहेऽथ महाकुम्भिकुम्भकान्तकुचोज्ज्वला । तस्य श्रीरिव सा विन्ध्यशक्तिना गुणमञ्जरी ॥ ४७ ॥**

अन्वयः–अथ महाकुंभि कुंभकांत कुच उज्ज्वला तस्य श्रीः इव सा गुणमंजरी विंध्यशक्तिना जगृहे. ॥ ४७ ॥

अर्थः–पछी महान् हाथीना कुंभस्थलसरखी मनोहर स्तनोथी शाभिती एवी ते राजानी लक्ष्मीसरखी ते गुणमंजरीने ते विंध्यश-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

क्तिराजए ग्रहण करी. ॥ ४७ ॥

सर्वतः पर्वतः सोऽथ गर्वतः प्रच्युतः कृती । भेजे संभवसूरिभ्यो भवसौरभ्यमुग्व्रतम् ॥ ४८ ॥

अन्वयः–अथ सर्वतः गर्वतः प्रच्युतः सः कृती पर्वतः संभवसूरिभ्यः भव सौरभ्यमुक् व्रतं भेजे. ॥ ४८ ॥

अर्थः—पछी सर्व प्रकारना गर्वथी रहित थयेला ते कृतार्थ पर्वतराजाए संभवनामना आचार्यपासे संसारनी वासनाने तजनारुं चारित्र ग्रहण कर्युं. ॥ ४८ ॥

विन्ध्यशक्तिवधे शक्तिर्भवतान्मे भवान्तरे । ईदृग्निदानध्यानेन तेने तेनातुलं तपः ॥ ४९ ॥

अन्वयः—भवांतरे विंध्यशक्ति वधे मे शक्तिः भवतात्? ईग् निदान ध्यानेन तेन अतुलं तपः तेने. ॥ ४९ ॥

अर्थः—भवांतरमां आ विंध्यशक्तिराजानो वध करवामां मारी शक्ति थाओ? एवी रीतना नियाणायुक्त ध्यानथी ते पर्वतराजा अनुपम तप तपवा लाग्यो. ॥ ४९ ॥

एवं तपः स विक्रीय तर्कैः कामगवीमिव । गृहीत्वानशनं मृत्वा प्रप्रेदे प्राणतं दिवम् ॥ ५० ॥

अन्वयः—एवं तर्कैः काम गवीं इव, तपः विक्रीय सः अनशनं गृहीत्वा, मृत्वा प्राणतं दिवं प्रपेदे. ॥ ५० ॥

अर्थः–एरीते छाशसाटे कामधेनुनीपेठे तप वेंचीने, ते अनशन लेइ, मृत्यु पामीने प्राणत देवलोकमां गयो. ॥ ५० ॥

विन्ध्यशक्तिरपि भ्राम्यन्भवाञ्जन्मनि कुत्रचित् । जिनलिङ्गधरो मृत्वा कल्पवृन्दारकोऽभवत् ॥ ५१ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अन्वयः–विंध्यशक्तिः अपि भवान् भ्राम्यन् कुतचित् जन्मनि जिन लिंगधरः मृत्वा कल्प वृंदारकः अभवत्. ॥ ५२ ॥

अर्थः—पछी ते विंध्यशक्ति राजा पण भवोमां भमतोथको, कोइक जन्ममां जैनलिंग (दीक्षा) धारण करीने, मरण पामी देवलोकमां देव थयो. ॥ ५२ ॥

**च्युत्वा च श्रीमतीकुक्षिजन्मा श्रीधरभूपभूः ।पुरेऽभूद्विजयपुरे कुमारस्तारकाभिधः ॥ ५२ ॥**

अन्वयः–च्युत्वा च विजयपुरे पुरे श्रीमती कुक्षि जन्मा श्रीधर भूप भूः तारक अभिधः कुमारः अभूत्. ॥ ५३ ॥

अर्थः–पछी त्यांथी चवीने विजयपुर नामना नगरमां श्रीमतीनामनी राणीनी कुक्षिए जन्मेलो श्रीधरनामना राजानो ते तारकनामनो कुमार थयो. ॥ ५३ ॥

**स सप्ततिधनुर्मात्रगात्रः पात्रं मषीत्विषाम् । द्विसप्तत्यब्दलक्षायुरभूदक्षामपौरुषः ॥ ५३ ॥**

अन्वयः–सः सप्तति धनुर्मात्र गात्रः, मषी त्विषां पात्रं, द्विसप्तति अब्द लक्ष आयुः, अक्षाम पौरुषः अभूत्. ॥ ५४ ॥

अर्थः—ते सीत्तेर धनुषना शरीरप्रमाणवाळो, मषीसरखी श्याम कांतिवाळो, बहोतेर लाख वर्षोना आयुवाळो, अने अतिशय बळवाळो हतो. ॥ ५४ ॥

**अन्ते पितुः प्रतापश्रीताडङ्कं चक्रमाप्य सः । प्रत्यर्धचक्री भूचक्रखण्डत्रयमसाधयत् ॥ ५४ ॥**

अन्वयः–अंते पितुः प्रताप श्री ताडंकं चक्रं आप्य सः प्रत्यर्ध चक्री भू चक्र खंड त्रयं असाधयत्. ॥ ५५ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—छेवटे ( पोताना ) पितानी प्रतापलक्ष्मीना कुंडलसरखुं चक्र मेळवीने तेणे प्रतिवासुदेव थइने पृथ्वीपरना त्रण खंडोने जीती लीधा. ॥ ५५ ॥

**इतश्चास्ति चतुर्वर्गश्रीनिरर्गलनागरा । मध्येऽब्धि स्वर्गसौभाग्यदारिका द्वारिका पुरी ॥ ५६ ॥**

अन्वयः—इतश्च मध्ये अब्धि चतुर्वर्ग श्री निरर्मल नागरा, स्वर्ग सौभाग्य दारिका द्वारिकापुरी अस्ति. ॥ ५६ ॥

अर्थः–हवे महासागरनी अंदर चारे वर्गोनी लक्ष्माथी भरपूर नागरिकोवाळी, तथा स्वर्गनी शोभानो पण तिस्कार करनारी द्वारिकानामनी नगरी छे. ॥ ५६ ॥

**ययपरैरपराभूता सुराष्ट्रमुखमण्डनम् । पश्चिमाम्भोधिनीरेभनराश्वैरेव वेष्ट्यते ॥ ५७ ॥**

अन्वयः—परैः अपराभूता, सुराष्ट्र मुख मंडनं या पश्चिम अंभोधि नीर इभ नर अश्वैः एव वेष्ट्यते. ॥ ५७ ॥

अर्थः—शत्रुओथी पराभव न पामेली, तथा सौरष्ट्रदेशना मुखने शोभावनारी, एवी जे नगरीने पश्चिम महासागरमां वसनाराज जलचर हाथीओ, मनुष्यो तथा घोडाओ वींटीने रहेला छे. ॥ ५७ ॥

**अगोचरचरित्रश्रीर्ब्रह्मविद्वचसामपि । ब्रह्मचारी परस्त्रीषु ब्रह्माभूदिह भूपतिः ॥ ५८ ॥**

अन्वयः—ब्रह्म विद् वचसां अपि अगोचर चरित्र श्रीः, पर स्त्रीषु ब्रह्मचारी ब्रह्मा इह भूपतिः अभूत्. ॥ ५८ ॥

अर्थः–ब्रह्मने जाणनारा योगीओनां वचनोने पण अगोचर छे आचरणनी लक्ष्मी जेनी, तथा परस्त्रीप्रते ब्रह्मचर्यने धारण करनारो



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ब्रह्मानामनो ते नगरीमां राजा हतो. ॥ ५८ ॥

**तस्याभूतां शुभे कान्ते सुभद्रोमे शुभद्युती । धारे इव कृपाणस्य सतीव्रतगुणश्रिते ॥ ५९ ॥**

अन्वयः—तस्य शुभे, शुभद्युती, कृपाणस्य धारे इव सतीव्रत गुण श्रिते सुभद्रा उमे कांते अभूतां. ॥ ५९ ॥

अर्थः-ते राजाने उत्तम, तथा मनोहर कांतिवाळी तलवारनी धारनीपेठे सतीव्रतरूपी गुणवाळी सुभद्रा अने उमानामनी बे स्त्रीओ हती

**ताभ्यां नरेन्दुः कान्ताभ्यां शुशुभे मुमुदे च सः । रजनीश इव ज्योत्स्नारजनीभ्यां कलोज्ज्वलः ॥**

अन्वयः-कला उज्ज्वलः सः नर इंदुः, ज्योत्स्ना रजनीभ्यां रजनी ईशः इव, ताभ्यां कांताभ्यां शुशुभे च मुमुदे. ॥६०॥

अर्थः-कलाओथी शोभतो एवो ते राजेंद्र, चांदनी तथा रात्रिवडे जेम चंद्र शोभे, तेम ते बन्ने स्त्रीओथी शोभतो हतो, तथा आनंद पामतो हतो,. ॥ ६० ॥

**इतश्चोत्तरतश्च्युत्वा सुभद्रागर्भमासदत् । जीवः पवनवेगस्य शृङ्गात्सिंहो गुहामिव ॥ ६१ ॥**

अन्वयः—इतश्च शृगात् सिंहः गुहां इव, पवनवेगस्य जीवः उत्तरतः च्युत्वा सुभद्रा गर्भं आसादत्. ॥ ६१ ॥

अर्थः-एवामां सिंह जेम शिखरपरथी गुफामां जाय छे, तेम पवनवेगनो जीव उत्तरमांथी चवीने ते सुभद्रा राणीना गर्भमां आव्यो.

**द्विपसिंहवृषादित्या इति स्वप्नचतुष्टयम् । सुभद्रासौ तदाद्राक्षीद्रामजन्माभिसूचकम् ॥ ६२ ॥**

अन्वयः—तदा असौ सुभद्रा राम जन्म अभिसूचकं द्विप सिंह वृष आदित्याः इति स्वप्न चतुष्टयं अद्राक्षीत्. ॥ ६२ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

अर्थः—ते वखते ते सुभद्राए बलभद्रना जन्मने सूचवनारां हाथी, सिंह, वृषभ तथा सूर्यनामना चार स्वप्नो जोयां. ॥ ६२ ॥

**सूते स्म समये सूनुमियमिन्दुसमद्युतिम् । शुक्तिर्मुक्ताकणमिव क्षितिभूषणतां गतम् ॥ ६३ ॥**

अन्वयः—शुक्तिः मुक्ता कणं इव, इयं समये इंदु सम द्युतिं, क्षिति भूषणतां गतं सूनुं सूतेस्म. ॥ ६३ ॥

अर्थ—पछी छीप जेम मोतीना दाणाने जन्म आपे, तेम तेणीए योग्य समये चंद्रसरखी कांतिवाळा, तथा पृथ्वीने शोभावनारा पुत्रने जन्म आप्यो. ॥ ६३ ॥

**कारामुक्त्यादिभिर्व्यक्तं द्विषामपि ददन्मुदम् । ब्रह्मा विजय इत्यस्य सुतस्य विदधेऽभिधाम् ॥ ६४ ॥**

अन्वयः–कारा मुक्ति आदिभिः द्विषां अपि व्यक्तं मुदं ददत् ब्रह्मा अस्य सुतस्य विजय इति अभिधां विदधे. ॥ ६४ ॥

अर्थः—केदीओने छोडवाआदिकथी शत्रुओने पण प्रगटपणे हर्ष आपनारा ते ब्रह्माराजाए ते पुत्रनुं "विजय" नाम पाड्युं.

**इन्द्रियश्रीभिरात्मेव पृथक्प्रथितकर्मभिः । धात्रीभिः पञ्चभिर्लाल्यमानोऽयं ववृधे श्रिया ॥ ६५ ॥**

अन्वयः–इंद्रिय श्रीभिः आत्मा इव, पृथक् प्रथित कर्मभिः पंचभिः धात्रीभिः लाल्यमानः अयं श्रिया ववृधे. ॥ ६५ ॥

अर्थः—इंद्रियोनी शोभाथी आत्मानीपेठे, जूदां जूदां कार्यो करनारी पांच धावोवडे लाड लडावातो ते विजय शोभाथी वृद्धि पामवा लाग्यो. ॥ ६५ ॥

**वर्धमानः क्रमादेष स्मितैः कुसुमयन्दिशः । वसन्तदिवसव्यूह इव कस्य न तुष्टये ॥ ६६ ॥**



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अन्वयः—क्रमात् वर्धमानः एपः स्मितैः दिशः कुसुमयन् वसंत दिवस व्यूहः इव कस्य तुष्टये न ? ॥ ६६ ॥

अर्थः—अनुक्रमे वृद्धि पामतो एवो ते विजयकुमार हास्यथी दिशाओने पुष्पित करतोथको वसंतऋतुना दिवसोना समूहनीपेठे कोना आनंदमाटे न थयो ? ॥ ६६ ॥

**अथोदरमुमादेव्याः प्राणतात्पर्वतश्च्युतः । अवाप पुण्यकृन्मुष्टिं चिन्तामणिरिवार्णवात् ॥ ६७ ॥**

अन्वयः—अथ अर्णवात् चिंतामणिः पुण्यकृत् मुष्टिं इव, प्राणतात् च्युतः पर्वतः उमादेव्याः उदरं अवाप. ॥ ६७ ॥

अर्थः—पछी महासागरमांथी निकळेलुं चिंतामणि रत्न जेम पुण्यशालीनी मुष्टिने प्राप्त थाय, तेम प्राणतदेवलोकमांथी चवेलो ते पर्वतनो जीव उमादेवीना उदरमां आव्यो. ॥ ६७ ॥

**करी सिंहो वृषश्चन्द्रो भानुर्वैश्वानरोऽम्बुधिः । इति स्वप्नानुमापश्यदच्युतोत्पत्तिसूचकान ॥ ६८ ॥**

अन्वयः—उमा करी सिंहः वृषः चंद्रः भानुः वैश्वानरः अंबुधिः इति अच्युत उत्पत्ति सूचकान् स्वप्नान् अपश्यत्. ॥ ६८ ॥

अर्थः—पछी ते उमाराणीए हाथी, सिंह, वृषभ, चंद्र, सूर्य, अग्नि तथा क्षीरसमुद्र नामनां वासुदेवना जन्मने सूचवनारां स्वप्नो जोयां.

**ततः सुतमसौ बालतमालदलदीधितिम् । विन्ध्यभूरिव भद्रेभं समये समजीजनत् ॥ ६९ ॥**

अन्वयः—ततः विंध्य भूः भद्र इभं इव, असौ समये बाल तमाल दल दीधितिं सुतं मसजीजनत्. ॥ ६९ ॥

अर्थः—पछी विंध्याचलनी भूमि जेम भद्रजातिना हाथीनो जन्म आपे, तेम आ उमाराणीए योग्य समये उगता तमालपत्र-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरखी (श्याम) कांतिवाळा पुत्रने जन्म आप्यो. ॥ ६९ ॥

**सुतोत्पत्तिं कथयता दानमानन्दितो ददत् । रचयामास न ब्रह्मा भेदमाद्यान्तयोरपि ॥ ७० ॥**

अन्वयः-आनंदितः ब्रह्मा सुत उत्पत्ति कथयतां दानं ददत् आद्य अंतयोः अपि भेदं न रचयामास. ॥ ७० ॥

अर्थः-आनंद पामेला ते ब्रह्माराजाए पुत्रनो जन्म कहेनारा मनुष्योने दान आपतांथकां पेहेला अने आ छेल्ला पुत्रवच्चे (कंइ पण) भिन्नपणुं कर्युं नही. ॥ ७० ॥

**नित्योत्सवानपि सुरानुत्सवेनापि लोभयन् । सूनोर्द्विपृष्ठ इत्याख्यां सत्यामदित भूपतिः ॥ ७१ ॥**

अन्वयः-नित्य उत्सवान् अपि सुरान् उत्सवेन लोभयन् भूपतिः सूनोः द्विपृष्ठ इति सत्यां आख्यां अदित. ॥ ७१ ॥

अर्थः-हमेशां उत्सववाळा एवा पण देवोने महोत्सवथी ललचावता एवा ते ब्रह्माराजाए ते पुत्रनुं "द्विपृष्ठ" एवुं सत्य नाम पाड्युं.

**अवर्धत स धात्रीभिः पुष्यमाणो यथाक्रमम् । नमस्क्रियाभिर्धर्मो वा पञ्चभिः परमेष्ठिनाम् ॥ ७२ ॥**

अन्वयः-परमेष्ठिनां नमस्क्रियाभिः धर्मः वा पंचभिः धात्रीभिः पुष्यमाणः सः यथाक्रमं अवर्धत. ॥ ७२ ॥

अर्थः-पंच परमेष्ठिना नमस्कारथी धर्मनीपेठे पांच धावमाताओवडे पोषातो ते द्विपृष्ठ पण अनुक्रमे वृद्धि पामवा लाग्यो. ॥७२॥

**मध्ये दशानां धात्रीणां तौ क्रीडन्तौ विरेजतुः । दिशामिव निशाधीशदिनाधीशौ वरोदयौ ॥७३॥**

अन्वयः—वर उदयौ निशा अधीश दिन अधीशौ दिशां इव, तौ दशानां धात्रीणां मध्ये क्रीडंतौ विरेजतुः. ॥ ७३ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

अर्थः—उत्तम उदयवाळा चंद्र अने सूर्य जेम दशे दिशाओमां क्रीडा करता शोभे छे, तेम तेओ बन्ने दश धात्रमाताओनीवच्चे क्रीडा करताथका शोभता हता. ॥ ७३ ॥

**नीलपीताम्बरौ तालशङ्खाङ्कौ तौ सितासितौ । धरित्रीजननेत्राणां मुदं चित्रेण चक्रतुः ॥ ७४ ॥**

अन्वयः—नील पीत अंबरौ, ताल शंख अंकौ, सित असितौ तौ धरित्री जन नेत्राणां चित्रेण मुदं चक्रतुः. ॥ ७४ ॥

अर्थः—श्याम तथा पीळां वस्त्रोने धारण करनारा, ताल तथा शंखना चिह्नवाळा, अने श्वेत तथा श्याम कांतिवाळा तेओ बन्ने पृथ्वीपरना लोकोनां चक्षुओने आश्चर्यथी आनंद करता हता. ॥ ७४ ॥

**दोर्भूषणं शस्त्रकलाः शास्त्राणि मुखभूषणम् । जगृहाते गुरुभ्यस्तौ मञ्जूषाभ्य इव स्वयम् ॥ ७५ ॥**

अन्वयः—तौ स्वयं मंजूषाभ्यः इव गुरुभ्यः दोर्भूषणं शस्त्र कलाः, मुख भूषणं शास्त्राणि जगृहाते. ॥ ७५ ॥

अर्थः—पछी तेओए पोते जेम पेटीमांथी, तेम गुरुपासेथी हाथना आभूषणसरखी शस्त्रकला, अने मुखना आभूषणसरखी शास्त्रोनी विद्या ग्रहण करी. ॥ ७५ ॥

**एकपात्रदशायुग्मदीप्तौ दीपाविवोज्ज्वलौ । तौ दुःखसुखयोस्तुल्यौ तुल्यस्नेहौ विलेसतुः ॥ ७६ ॥**

अन्वयः—एक पात्र दशा युग्म दीप्तौ दीपौ इव उज्ज्वलौ, सुख दुःखयोः तुल्यौ, तुल्य स्नेहौ तौ विलेसतुः ॥ ७६ ॥

अर्थः—एक पात्रमां रहेली बे वाटोथी प्रगट थयेला दीपकनीपेठे कांतिवाळा, सुखदुःखमां सरखा, अने तुल्य प्रीतिवाळा (पक्षे·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तुल्य तेलवाळा) एवा तेओ बन्ने विलास करता हता. ॥ ७६ ॥

**तौ शस्त्रतोऽधिकं शश्वत्क्रीडयैवार्धचक्रिणः । अशस्त्रमाज्ञाभङ्गाख्यं वधं वध्यस्य चक्रतुः ॥ ७७ ॥**

अन्वयः—तौ शश्वत् क्रीडया एव वध्यस्य अर्ध चक्रिणः, शस्त्रतः अधिकं आज्ञा भंग आख्यं वधं चक्रतुः. ॥ ७७ ॥

अर्थः—तेओ बन्ने हमेशां क्रीडामात्रमांज वधकरवालायक प्रतिवासुदेवना, शस्त्रथी पण अधिक, आज्ञाभंगनामनो वध करवा लाग्या.

**परिज्ञाय तयोर्दूरादाज्ञातिक्रमविक्रमं । स्पृशो गत्वा त्वरातारास्तारकं प्रत्यदोऽवदन् ॥ ७८ ॥**

अन्वयः—स्पृशः दूरात् तयोः आज्ञा अतिक्रम विक्रमं परिज्ञाय, त्वरातारा: तारकं प्रति गत्वा अदः अवदन्. ॥ ७८ ॥

अर्थः—(त्यारे) गुप्त चरोए दूरथीज तेओ बन्नेना आज्ञाना उल्लंघनरूप पराक्रमने जाणीने, एकदम जइने ते तारकनामना प्रतिवासुदेवने ते हकीकत जणावी के, ॥ ७८ ॥

**देव त्वत्सेवकस्यापि दारकौ द्वारिकापतेः । आज्ञां तव न मन्येते धुर्यौ रश्मिमिवोद्धतौ ॥ ७९ ॥**

अन्वयः—(हे) देव! त्वत् सेवकस्य अपि द्वारिकापतेः दारकौ, उद्धतौ धुर्यौ रश्मिं इव तव आज्ञां न मन्येते. ॥ ७९ ॥

अर्थः—हे स्वामी? आपना सेवक एवा पण द्वारिकाधीशना बन्ने पुत्रो, उद्धत बळदो जेम रासने गणकारता नथी, तेम आपनी आज्ञा मानता नथी. ॥ ७९ ॥

**गतः स कालस्तेजोऽस्तु तारकस्य क्व संप्रति । शूरौ यदुदितावेतावित्याहुः सेवकास्तयोः ॥ ८० ॥**

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अन्वयः—सः कालः गतः, संप्रति तारकस्य तेजः क अस्तु ? यत् एतौ शूरौ उदितौ, इति तयोः सेवकाः आहुः. ॥ ८० ॥

अर्थः—ते समय हवे चाल्यो गयो छे, हवे ते तारकनुं तेज क्यां रह्युं छे ? केमके आ बन्ने सूर्यो ( शूरवीरो ) उदय पाम्या छे, एम तेओ बन्नेना सेवको कहेवा लाग्या छे. ॥ ८० ॥

**अखर्वदोर्बलौ सर्वशस्त्रज्ञौ गर्वपर्वतौ । त्वां प्रति प्रतिभातस्तौ न शुभौ शोभनं कुरु ॥ ८१ ॥**

अन्वयः—अखर्व दोर्बलौ, सर्व शस्त्रज्ञौ, गर्व पर्वतौ तौ त्वां प्रति प्रतिभातः, शुभौ न, शोभनं कुरु ? ॥ ८१ ॥

अर्थः—न अटकावी शकाय एवा भुजबलवाळा, सर्व शस्त्रकला जाणनारा, तथा गर्वथी पर्वतसरखा, एवा तेओ बन्ने तमारा सामोवडीया थइने जे उभा छे, ते ठीक नथी, माटे योग्य (उपाय) करो ? ॥ ८१ ॥

**इति श्रुत्वोद्धतक्रोधो यमयोधोध्धुरस्वरः । ऊचेऽर्धचक्री सेनान्यं सेनान्यञ्चितसागरः ॥ ८२ ॥**

अन्वयः—इति श्रुत्वा उद्धत क्रोधः, यम योध उध्धुर स्वरः, सेना न्यंचित सागरः अर्धचक्री सेनान्यं ऊचे. ॥ ८२ ॥

अर्थः—एम सांभळीने, क्रोधातुर थयेलो, यमना योधासरखा उद्धत नादवाळो, तथा सैन्यथी महासागरने पण भरी देनारो ते प्रतिवासुदेव (पोताना) सेनापतिने कहेवा लाग्यो के, ॥ ८२ ॥

**सपुत्रद्वारिकाधीशवधप्रधनसंधया । प्रपञ्चय चमूवीचीर्नीचीकृतकुलाचलाः ॥ ८३ ॥**

अन्वय,—सपुत्र द्वारिका अधीश वध प्रधन संधया, नीचीकृत कुल अचलाः चमूवीचीः प्रपंचय ? ॥ ८३ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

P 10753

अर्थः—पुत्रोसहित द्वारिकाना राजानो वध करवाना संग्रामनी प्रतिज्ञाथी कूलपर्वतोने पण नीचां करे, एवी सेनानी तैयारी करो?

**न चाटुवचनैर्नाग्रेलुण्ठनैर्नांघ्रिसेवनैः । न चाननतृणादानैस्ते मोक्तव्याः कथंचन ॥ ८४ ॥**

अन्वयः—चाटु वचनैः न, अग्रे लुंठनैः न, अंघ्रि सेवनैः न, च आनन तृण आदानैः ते कथंचन न मोक्तव्याः. ॥ ८४ ॥

अर्थः—नही मीठां वचनोथी, नही आगळ लोटवाथी, नही पगे पडवाथी, के नही मुखमां तृण लेवाथी, तेओने कोइपण रीते छोडवा नही. ॥ ८४ ॥

**अधुनैवाधिकोत्साहैर्वाहैः सज्जय मे रथम् । मास्तु कालविलम्बस्ते भम्भां संभावय द्रुतम् ॥ ८५ ॥**

अन्वयः—अधुना एव अधिक उत्साहैः वाहैः मे रथं सज्जय? काल विलंबः मा अस्तु? ते भंभां द्रुतं संभावय? ॥ ८५ ॥

अर्थः—हमणाज अधिक उत्साहवाळा घोडाओवडे मारो रथ तैयार कर? तेमां जरा पण वखतनो विलंब थवो न जोइये, अने तारां रणशींगांनी तुरत संभाळ ले? ॥ ८५ ॥

**अथामात्यपतिर्भूपमजल्पन्नयकल्पवित् । देव सेवक एवाद्य यावदस्ति स ते नृपः ॥ ८६ ॥**

अन्वयः—अथ नय कल्पवित् अमात्यपतिः भूपं अजल्पत्, (हे) देव! सः नृपः अद्य यावत् ते सेवकः अस्ति. ॥ ८६ ॥

अर्थः—त्यारे नीतिआचारने जाणनारा मंत्रीश्वरे राजाने कह्युं के, हे स्वामी! ते राजा आजदनसुधी आपनो सेवक छे. ॥ ८६ ॥

आ श्रीकैलाससागरसूरि ज्ञानमन्दिर श्रीमहावीर जैन आराधना केन्द्र कोबा (गांधीनगर) पिन ३८२००९

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

**निदेशवर्तिनं चैनं मानयोग्यं निगृह्णतः । परिवारेऽपि पुंनाग विरागस्ते भविष्यति ॥ ८७ ॥**

अन्वयः-हे पुंनाग! निदेश वर्तिनं, च मानयोग्यं एनं निगृह्णातः ते परिवारे अपि विरागः भविष्यति. ॥ ८७ ॥

अर्थः-हे पुरुषोत्तम! आज्ञामां रहेला, अने सन्मानयोग्य एवा ते राजाने मारवाथी आपना परिवारमां पण विखवाद थशे.

**तदुत्पादयितुं दोषं दूतस्तं प्रति युज्यताम् । मृत्युरप्यङ्गिनं हन्ति नान्नदोषादिना विना ॥ ८८ ॥**

अन्वयः—तत् दोषं उत्पादयितुं तंप्रति दूतः युज्यतां ? मृत्युः अपि अन्न दोष आदिना विना अंगिनं न हंति. ॥ ८८ ॥

अर्थः-माटे तेनापर आरोप मूकवामाटे तेनीपासे दूतने मोकलवो जोइये, केमके मृत्यु पण अनाजना दोषआदिकविना प्राणीने-मारतो नथी. ॥ ८८ ॥

**दूतेनाश्वेभरत्नानि याच्योऽसौ चेन्न दास्यति । तद्दोषी दोषवान्सर्वो विभौ हि च्छलवीक्षके ॥ ८९ ॥**

अन्वयः-दूतेन अश्व इभ रत्नानि असौ याच्यः, चेत् न दास्यति, तत् दोषी, हि छल वीक्षके विभौ सर्वः दोषवान्. ॥ ८९ ॥

अर्थः—दूतमारफते घोडा, हाथी तथा रत्नोनी तेनी पासे मागणी करवी, जो न आपे, तो तेने गुन्हेगार जाणवो, केमके छल जोनारा स्वामीपासे सर्व कोइ गुन्हेगार छे. ॥ ८९ ॥

**राज्ञाथ तद्गिरि प्रीतिं वहता प्रहितश्चरः । पार्श्वस्थितसुतद्वन्द्वं ब्रह्माणं स्माह संसदि ॥ ९० ॥**

अन्वयः—अथ तद्गिरि प्रीतिं वहता राज्ञा प्रहितः चरः, संसदि पार्श्व स्थित सुत द्वंद्वं ब्रह्माणं स्माह. ॥ ९० ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—पछी ते मंत्रीना वचनमां प्रीति धारण करनारा ते राजाए मोकलेलो दूत सभामां जइने, पासे बेठेला बन्ने पुत्रोवाळा ते ब्रह्माराजाने कहेवा लाग्यो के, ॥ ९० ॥

**भूप त्वां तारको वक्ति भक्तिमान्सेवकोऽसि मे । तत्पाल्योऽसि ममैव त्वं किं ते हस्तिहयादिना ॥९१॥**

अन्वयः-(हे) भूप! त्वां तारकः वक्ति, त्वं मे भक्तिमान् सेवकः असि, तत् मम एव पाल्यः असि, ते हस्ति हय आदिना किं?

अर्थः—हे राजन्! तने तारक राजा एम कहे छे के, तुं मारो भक्तिवंत सेवक छो, अने तेथी मारेज तारुं रक्षण करवानुं छे, माटे तारे हाथी घोडाआदिकनी शी जरुर छे? ॥ ९१ ॥

**यच्छ तत्सर्वमस्मभ्यं यन्न लभ्यं तवास्ति यत् । यद्वस्तु भरतार्धे स्याद् भरतार्धपतेर्हि तत् ॥ ९२ ॥**

अन्वयः—तत् सर्वं अस्मभ्यं यच्छ? यत् तव लभ्यं न अस्ति, हि भरत अर्धे यत् वस्तु स्यात्, तत् भरत अर्धपतेः. ॥ ९२ ॥

अर्थः—माटे ते सघळुं अमोने आपी दीओ? तमारे कंइं पण राखवानुं नथी, कारणके आ भरतार्धमां जे कंइं वस्तु छे, ते सघळी भरतार्धना स्वामीनी छे. ॥ ९२ ॥

**जल्पन्तमित्यमुं कोपस्वल्पकल्पान्तपावकः । दूतं भ्रूतन्तुतेजोभिर्बध्नन्निव जगौ हरिः ॥ ९३ ॥**

अन्वयः—इति जल्पंतं अमुं, दूतं कोप स्वल्प कल्पांत पावकः हरिः भ्रू तंतु तेजोभिः बध्नन् इव जगौ. ॥ ९३ ॥

अर्थः-एरीते बोलता एवा ते दूतने, क्रोधथी कल्पांत कालना अग्निने पण स्वल्प करनारा वासुदेव, भ्रकुटिना तंतुओना तेजथी

जाणे बांधता होय नही! तेम बोलवा लाग्या के, ॥ ९३ ॥

**कुलक्रमागते राज्ये वयं स्मः स च विद्यते । स चेन्न सेवकोऽस्माकं तत्किं तत्सेवका वयम् ॥ ९४ ॥**

अन्वयः-कुल क्रम आगते राज्ये वयं स्मः, च सः विद्यते, सः चेत् अस्माकं सेवकः न, तत् वयं तत् सेवकाः किं? ॥ ९४ ॥

अर्थः—कुलपरंपराथी आवेलुं राज्य अमो भोगवीये छीये, अने ते पण भोगवे छे, अने जो ते अमारो सेवक नथी, तो अमो तेना शाना सेवको होइ शकीये? ॥ ९४ ॥

**सोऽस्माकं पालको भूत्वा मूढो रत्नानि याचते । यदा प्रत्युत याचिष्ये कस्तं पालयिता तदा ॥ ९५ ॥**

अन्वयः-सः मूढः अस्माकं पालकः भूत्वा यदा रत्नानि याचते, प्रत्युत याचिष्ये, तदा तं कः पालयिता? ॥ ९५ ॥

अर्थः—ते मूर्खो अमारो रक्षक थईने ज्यारे रत्नोनी मागणी करे छे, परंतु कदाच हुं तेनीपासेथी तेवी मागणी करीश, त्यारे तेनुं रक्षण कोण करशे? ॥ ९५ ॥

**मयि स्थिते हरौ क्रोष्टा भरतार्धपतिः क सः । गच्छ तच्छिरसा सार्धं रत्नान्यादातुमेम्यहम् ॥ ९६ ॥**

अन्वयः-मयि हरौ स्थिते सः क्रोष्टा भरत अर्ध पतिः क? गच्छ? अहं तत् शिरसा सार्धं रत्नानि आदातुं एमि, ॥ ९६ ॥

अर्थः—हुं सिंह ( पक्षे-विष्णु ) बेठां ते शीयालसरखो भरतार्धनो स्वामी ( पक्षे-प्रतिविष्णु ) शुं वीसातमां छे. माटे तुं चाल्यो जा? अने हुं तेनां मस्तकसहित रत्नो लेवाने आवुं छुं. ॥ ९६ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इत्युक्त्वा विष्णुनोत्खात इव भ्रूशिखयासनात् । स गत्वाशु चरः सर्वं स्वभर्त्रे तथ्यमभ्यधात् ॥ ९७ ॥

अन्वयः-इति उक्त्वा विष्णुना भ्रू शिखया आसनात् उत्खातः इव, सः चरः आशु गत्वा, स्वभर्त्रे सर्वं तथ्यं अभ्यधात्. ९७

अर्थः—एम कहीने विष्णुए भ्रुकुटिनी शिखाथी जाणे आसनपरथी उखेडी नाख्यो होय नही! तेम ते दूते तुरत जइने पोताना स्वामिने सघळी सत्य हकीकत कही संभळावी. ॥ ९७ ॥

क्रोधक्रौर्यत्रसत्कालस्तत्कालमथ तारकः । रिपुप्राणप्रयाणाय प्रयाणकमकारयत् ॥ ९८ ॥

अन्वयः—अथ क्रोध क्रौर्य त्रसत् कालः तारकः रिपु प्राण प्रयाणाय प्रयाणकं अकारयत्. ॥ ९८ ॥

अर्थः-पछी क्रोध तथा क्रूरताथी यमने पण डरावनारा ते तारक प्रतिवासुदेवे शत्रुना प्राणोनो नाश करवामाटे (त्यांथी) प्रयाण कराव्युं. ॥ ९८ ॥

जिताम्भोधरसंभारभम्भारवनवश्रवात् । मनोमयूराः शूराणामखण्डं ताण्डवं व्यधुः ॥ ९९ ॥

अन्वयः-जित अंभोधर संभार भंभा रव नव श्रवात् शूराणां मनः मयूराः अखंडं तांडवं व्यधुः. ॥ ९९ ॥

अर्थः-जितेल छे मेघनी गर्जना जेणे एवा भेरीना नवा नादना श्रवणथी शूरवीरोनां हृदयरूपी मयूरो अखंडपणे नृत्य करवा लाग्या.

अभूच्चतुर्भिः पूर्द्वारैश्चतुरङ्गचमूद्गमः । चतुर्विधायुधोद्दामश्चतुर्भुजजयेच्छया ॥ १०० ॥

अन्वयः—चतुर्भुज जय इच्छया चतुर्भिः पूर्द्वारैः चतुर्विध आयुध उद्दामः चतुरंग चमू उद्गमः अभूत्. ॥ १०० ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—पछी चार भुजाओवाळा ते विष्णुने जीतवानी इच्छाथी नगरना चार दरवाजाओमांथी चार प्रकारना शस्त्रोवडे प्रचंड बनेलां चतुरंगी सैन्यनी उत्पत्ति थइ. ॥ १०० ॥

**मिलद्भिर्मन्त्रिधात्रीशदेशाधीशादिसैनिकैः । तच्चमूर्ववृधे यान्ती नदी नद्यन्तरैरिव ॥ १ ॥**

अन्वयः-मिलद्भिः मंत्रि धात्री ईश देश अधीश आदि सैनिकैः, नद्यंतरैः नदी इव, यांती तत् चमूः ववृधे. ॥ १ ॥

अर्थः—तेमां आवी मलता मंत्रीओ, राजाओ, अने मंडलीको आदिकोना सुभटोवडे, बीजी नदीओथी जेम (मुख्य) नदी, तेम चालती एवी तेनी सेना वृद्धि पामवा लागी. ॥ १ ॥

**प्रयाणैरप्रमाणैश्च सावेशः प्रतिकेशवः । द्रागलङ्घिष्ट मार्गार्धमलङ्घितपराक्रमः ॥ २ ॥**

अन्वयः—च स आवेशः, अलंघित पराक्रमः प्रतिकेशवः अप्रमाणैः प्रयाणैः द्राक् मार्ग अर्धं अलंघिष्ट. ॥ २ ॥

अर्थः—पछी आवेशमां आवेलो, अने नथी उल्लंघायेलुं पराक्रम जेनुं एवा ते प्रतिवासुदेवे प्रमाणरहित प्रयाणोवडे तुरत अर्ध मार्गनुं उल्लंघन कर्युं. ॥ २ ॥

**इतश्च तादृगुत्साहसाहसाभोगभूषितः । हरिरप्येत्य मार्गार्धं रुद्धवान्मार्गमग्रतः ॥ ३ ॥**

अन्वयः-इतश्च तादृक् उत्साह साहस आभोग भूषितः, हरिः अपि मार्ग अर्धं एत्य अग्रतः मार्गं रुद्धवान्. ॥ ३ ॥

अर्थः—एवामां तेवाज उत्साह अने साहसथी अलंकृत थयेला विष्णुए पण अर्धे मार्गे आवीने अगाडीना मार्गने रोकी दीधो.



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततः प्रततसंग्रामगुणग्रामग्रहोन्मुखाः । यमश्रुतिसुखां वार्तां प्रतेनुरुभये भटाः ॥ ४ ॥

अन्वयः-ततः प्रतत संग्राम गुण ग्राम ग्रह उन्मुखाः उभये भटाः यम श्रुति सुखां वार्तां प्रतेनुः. ॥ ४ ॥

अर्थः—पछी विस्तीर्ण संग्रामना गुणग्राम करवाने तत्पर थयेला बन्ने सैन्योना सुभटो यमना कर्णोने जेथी सुख उपजे एवी वार्ता करवा लाग्या. ॥ ४ ॥

एकैकजन्तुग्रासेनातृप्तमालस्यशायिनम् । यमं जागरयामासुर्युद्धतूर्यस्वना घनाः ॥ ५ ॥

अन्वयः-घनाः युद्ध तूर्य स्वनाः एक एक जंतु ग्रासेन अतृप्तं, आलस्य शायिनं यमं जागरयामासुः. ॥ ५ ॥

अर्थः—युद्धना वाजित्रोना गंभीर नादो, एकेका प्राणीना भोजनथी तृप्त नही थयेला, अने आळसमां सूतेला यमराजने जगाडवा लाग्या. ॥ ५ ॥

देहैः प्रहतिसस्नेहै रोमाञ्चोच्छ्वासवारितान् । सन्नाहाञ्जगृहुः कष्टं भटाः स्वामिजयेच्छया ॥ ६ ॥

अन्वयः-भटाः स्वामि जय इच्छया, रोमांच उच्छ्वास वारितान् सन्नाहान्, प्रहति स स्नेहैः देहैः कष्टं जगृहुः ॥ ६ ॥

अर्थः—पछी सुभटोए (पोतपोताना) स्वामिना विजयनी इच्छार्थी, रोमांचोना उद्गमथी अटकायेलां बखतरोने, संग्राममां प्रितिवाळां (पोतानां) शरीरोपर मुश्केलीथी चडाववा लाग्या. ॥ ६ ॥

इष्टोऽत्र मृत्युरागच्छन्परिरब्धुं चिरेप्सितः । पराङ्मुखा भून्मे मेति नागृह्णन्केऽपि कञ्चुकान् ॥ ७ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अन्वयः—अत्र इष्टः, चिर इप्सितः, परिरब्धुं आगच्छन् मृत्युः मा मा परांमुखः भूत्, इति के अपि कंचुकान् न अगृह्णन्.

अर्थः—अहीं व्हालुं तथा घणा काळथी इच्छेलुं, भेटवाने आवतुं मरण पाछुं न वळी जाय तो ठीक, एम विचारीने केटलाक सुभटोए तो बख्तरो पण पेहेर्यां नही. ॥ ७ ॥

**ततः पारापतद्यूतकारा इव घनत्वराः । उभयेऽप्यमिलन्वीरा वपुर्नीरागचेतसः ॥ ८ ॥**

अन्वयः—ततः पारापत द्यूतकाराः इव घन त्वराः उभये अपि वीराः, वपुः नीराग चेतसः अमिलन्. ॥ ८ ॥

अर्थः—पछी पारेवां अने जुगारीओनीपेठे अति उतावळथी बन्ने सैन्योना सुभटो हृदयथी पण शरीरनी दरकार राख्याविना (सामसामा) आवी मळ्या. ॥ ८ ॥

**असयोऽन्तर्वसद्भर्तृप्रतापज्वलिता इव । परस्पराभिपातेन स्फुलिङ्गान्मुमुचुर्मुहुः ॥ ९ ॥**

अन्वयः—अंतः वसत् भर्तृ प्रताप ज्वलिताः इव, असयः परस्पर अभिपातेन मुहुः स्फुलिंगान् मुमुचुः. ॥ ९ ॥

अर्थः—हृदयमां वसता स्वामिना प्रतापथी जाणे सळगी उठी होय नही! तेम तलवारो परस्पर अथडावाथी वारंवार तणखाओने झरवा लागी. ॥ ९ ॥

**द्विषत्तेजोऽग्निमेघेषु गजेषु मदवर्षिषु । खद्योतकल्पैरद्योति स्फुलिङ्गैर्दन्तघातजैः ॥ १० ॥**

अन्वयः—द्विषत् तेजः अग्नि मेघेषु गजेषु मद वर्षिषु खद्योत कल्पैः दंत घात जैः स्फुलिंगैः अद्योति. ॥ १० ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः–शत्रुओना तेजरूपी अग्निथी उत्पन्न थयेलां वादळांओसरखा हाथीओ मदनो वरसाद वरसावते छते, पतंगीयांओसरखा, दांतोना घातोथी उत्पन्न थयेला तणखाओ दीपवा लाग्या. ॥ १० ॥

सायकाः शाकिनीमन्त्रा इव स्यन्दनशालिनाम् । अदृष्टा एव वध्याङ्गप्रविष्टा रुधिरं पपुः ॥ ११ ॥

अन्वयः–स्यंदन शालिनां सायकाः शाकिनी मंत्राः इव, अदृष्टाः एव वध्य अंग प्रविष्टाः रुधिरं पपुः. ॥ ११ ॥

अर्थः–रथोवडे मनोहर ( रथोमां बेठेला ) सुभटोनां बाणो शाकिनीओना मंत्रोनीपेठे अदृश्यपणेज शत्रुओना शरीरोमां दाखल थइने रुधिर पीवा लाग्या. ॥ ११ ॥

वाहवद्भिर्मणिश्रेणिसन्नाहद्युतिवेणिभीः । नाबोधि रुधिरं निर्यताद्दक्शल्यप्रहारजम् ॥ १२ ॥

अन्वयः–मणि श्रेणि सन्नाह द्युति वेणिभिः वाहवद्भिः, तादृक् शल्य प्रहार जं निर्यत् रुधिरं न अबोधि. ॥ १२ ॥

अर्थः–मणिओनी श्रेणिओवाळां बख्तरोनी कांतिओनी हारवाळा घोडेस्वारोए तेवा प्रकारना भालांओना प्रहारथी उत्पन्न थयेलां, अने (शरीरमांथी बहार) निकळतां रुधिरने जाणी पण शक्या नही. ॥ १२ ॥

सन्नाहशस्त्रदण्डास्थिखण्डानां त्रुटतां स्वनैः । घ्नतां घोषैश्च घोरोऽभून्मृत्योरपि भिये क्षणः ॥ १३ ॥

अन्वयः–त्रुटतां सन्नाह शस्त्र दंड अस्थि खंडानां स्वनैः, च घ्नतां घोषैः घोरः क्षणः मृत्योः अपि भिये अभूत्. ॥ १३ ॥

अर्थः—त्रुटी पडतां बख्तरो, शस्त्रो, दंडो तथा हाडकांओना टुकडाओना शब्दोथी, तथा घायल थता सुभटोना आर्तनादोथी प्रचंड

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

बनेलो ते रणसंग्राम यमराजने पण भयानक थइ पड्यो. ॥ १३ ॥

**प्रकम्पितासयो हस्ता मौलयः सिंहनादिनः । अमर्षिणां द्विषत्खड्गोत्क्षिप्ताः खेऽत्रासयन्सुरान् ॥ १४ ॥**

अन्वयः—द्विषत् खड्ग उत्क्षिप्ताः अमर्षिणां प्रकंपित असयः हस्ताः, सिंह नादिनः मौलयः खे सुरान् अत्रासयन्. ॥ १४ ॥

अर्थः—शत्रुओना खड्गोवडे उंचे उडेला शूरवीरोना, कंपती तलवारोवाळा हाथ, तथा सिंहनाद करनारां मस्तको आकाशमां रहेला देवोने पण त्रास पमाडवा लाग्या. ॥ १४ ॥

**युध्यमानमहावीरः क्षीणवीरगणः क्षणम् । व्यक्तोऽजनि रणः कामं कालकान्तादृगुत्सवः ॥ १५ ॥**

अन्वयः—युध्यमान महावीरः, क्षीण वीर गणः, काल कांता दृग् उत्सवः, क्षणं कामं व्यक्तः रणः अजनि. ॥ १५ ॥

अर्थः—युद्ध करता छे महान् सुभटो जेमां, नाश पाम्या छे वीरोना समूहो जेमां, तथा यमनी स्त्रीनी (चंडिकानी) आंखोने आनंद आपनारो, क्षणवारसुधी सारीरीते (जोरथी) प्रगटपणे संग्राम थयो. ॥ १५ ॥

**क्षीणास्त्रो बाहुमेव स्वमस्त्रीकृत्य द्विषत्कृतम् । चक्रे कश्चन पीठाब्जमागताया जयश्रियः ॥ १६ ॥**

अन्वयः—क्षीण अस्त्रः कश्चन स्वं बाहुं एव अस्त्रीकृत्य आगतायाः जयश्रियः द्विषत् कृतं पीठ अब्जं चक्रे. ॥ १६ ॥

अर्थः—खूटी गयेलां शस्त्रोवाळा कोइक सुभटे पोताना हाथनेज शस्त्ररूप करीने, आवेली जयलक्ष्मीने (बेसवामाटे) शत्रुए आपेली पीठनेज कमलरूप करी. ॥ १६ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

छिन्नायुधभुजामौलिः कश्चिदुत्पत्य कोपतः । ऊरुसंदंशबन्धेन द्विषमाशु व्यसुं व्यधात् ॥ १७ ॥

अन्वयः–छिन्न आयुध भुजा मौलिः कश्चित् कोपतः उत्पत्य ऊरु संदंश बंधेन द्विषं आशु व्यसुं व्यधात्. ॥ १७ ॥

अर्थः–शस्त्रथी छेदाइ गया छे हाथ तथा मस्तक जेना एवा कोइक सुभटे क्रोधथी उछळीने, शत्रुने ( पोताना ) बे साथळोरूपी साणसामां दावीने तुरत प्राणरहित कर्यो. ॥ १७ ॥

कोऽप्यभ्युत्थापयन्नङ्गान्याजिकण्डूभरच्छिदे । प्रहारान्दृढयामास रिपोर्मन्दप्रहारिणः ॥ १८ ॥

अन्वयः–कः अपि आजि कंडू भर च्छिदे अंगानि अभ्युत्थापयन् मंद प्रहारिणः रिपोः प्रहारान् दृढयामास. ॥ १८ ॥

अर्थः—कोइक सुभटे तो संग्रामनी खरजनो समूह मटाडवामाटे, (पोतानां) अंगो आगळ धरीने, धीमेथी प्रहार करता शत्रुना प्रहारोने मजबूत बनाव्या. ॥ १८ ॥

दृक्पातेनैव निर्भग्ने परवीरगणेऽपरः । अपूर्णयुद्धाभिप्रायोऽभजत्प्रायोपवेशनम् ॥ १९ ॥

अन्वयः–दृक् पातेन एव पर वीर गणे निर्भग्ने अपरः, अपूर्णयुद्ध अभिप्रायः प्राय उपवेशनं अभजत्. ॥ १९ ॥

अर्थः—फक्त (पोताना) दृष्टिपातथीज शत्रुना सुभटोनो समूह नाशी जवाथी कोइक सुभटने तो संग्रामनी इच्छा पूर्ण न थवाथी बेसीज रहेवुं पडयुं. ॥ १९ ॥



P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

**तुल्यं हक्कां प्रहारं च। दत्वा हक्काच्युतायुधे। द्विषि द्विखण्डिते कोऽपि स्वं जघानानुतापतः ॥ २० ॥**

अन्वयः—कः अपि हक्कां च प्रहारं तुल्यं दत्वा, हक्का च्युत आयुधे द्विषि द्वि खंडिते अनुतापतः स्वं जघान. ॥ २० ॥

अर्थः—कोइक सुभटे तो एकसरखी हांकल तथा प्रहार देइने, हांकलथी खरी पडेलां हथीयारवाळो शत्रु होते छते, पश्चात्तापथी पोते आपघात कर्यो. ॥ २० ॥

**स्वाङ्गे प्रहारमिच्छन्तौ दृढं कौचिन्महाभटौ। क्रुधान्यतोऽन्यतो यातौ दयामन्दप्रहारिणौ ॥ २१ ॥**

अन्वयः—स्व अंगे दृढं प्रहारं इच्छंतौ कौचित् महाभटौ दया मंद प्रहारिणौ क्रुधा अन्यतः अन्यतः यातौ. ॥ २१ ॥

अर्थः—पोत पोताना शरीरपर गाढ प्रहारने इच्छता एवा कोइक बे महासुभटो, दयाथी मंद प्रहार करताथका क्रोधथी बीजी बीजी जगोए चाल्या गया. ॥ २१ ॥

**प्रतिघातमकुर्वन्तो दत्तघातेषु शत्रुषु। पश्यन्तः सदृशं वीरं चिरं केऽप्यभ्रमन्भटाः ॥ २२ ॥**

अन्वयः—दत्त घातेषु शत्रुषु प्रतिघातं अकुर्वंतः, सदृशं वीरं पश्यंतः के अपि भटाः चिरं अभ्रमन्. ॥ २२ ॥

अर्थः—घा करनारा शत्रुओपर सामो घा नही करता, अने पोतासरखा शूरवीरने शोधताथका केटलाक सुभटो घणा काळसुधी भमवा लाग्या. ॥ २२ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

द्विषि प्रहारिण्यभ्यासादङ्गनाशं चकार यः । वीरास्तमप्यमन्यन्त कातरं जातरंहसः ॥ २३ ॥

अन्वयः–प्रहारिणि द्विपि यः अभ्यासात् अंग नाशं चकार, तं अपि जात रंहसः वीराः कातरं अमन्यंत ॥ २३ ॥

अर्थः–शत्रु प्रहार करते छते जेणे अभ्यासथी (पोतानांज) शरीरनो नाश कर्यो छे, तेने पण शूरवीर सुभटो कायर मानवा लाग्या.

अबिभ्यत्सुभटेभ्यस्तच्छस्त्रं शस्त्रेण योऽच्छिनत् । मृत्युभीतो न वीरेषु सोऽपि रेखामवाप्तवान् ॥ २४ ॥

अन्वयः–सुभटेभ्यः अबिभ्यत् यः तत् शस्त्रं शस्त्रेण अच्छिनत्, सः अपि मृत्यु भीतः वीरेषु रेखां न अवाप्तवान ॥ २४ ॥

अर्थः–सुभटोथी नही डरनारा एवा जे सुभटे तेनां शस्त्रने शस्त्रथी छेदी नाख्युं, ते पण मृत्युथी बीकण मनातो थको शूरवीरोनी गणनामां आवी शक्यो नही. ॥ २४ ॥

एवं तरन्तो युद्धाब्धिं दोर्भ्यामेवोभये भटाः । सकौतुकमलोक्यन्त दृक्पातेन जयश्रिया ॥ २५ ॥

अन्वयः–एवं दोर्भ्यां एव युद्ध अब्धिं तरंतः उभये भटाः, जय श्रिया दृक् पातेन अलोक्यंत. ॥ २५ ॥

अर्थः–ए रीते बन्ने हाथथीज संग्रामरूपी महासागरने तरनारा ते बन्ने सैन्योना सुभटोने जयलक्ष्मीए (फक्त) दृष्टिपातथी जोया.

आरुह्याथ रथं तल्पमिवाभीष्टं जयश्रियः । तत्कण्ठमिव वैकुण्ठः पाञ्चजन्यं मुदाग्रहीत् ॥ २६ ॥

अन्वयः–अथ जय श्रीयः अभीष्टं तल्पं इव रथं आरुह्य वैकुंठः तत्कंठं इव पांचजन्यं मुदा अग्रहीत् ॥ २६ ॥

अर्थः—पछी जयलक्ष्मीनी व्हाली शय्या सरखा रथपर चडीने विष्णुए तेणीना कंठसरखा पांचजन्य शंखने हर्षथी ग्रहण कर्यो.



P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

अस्त्राधिदैवतान्यस्त्रशय्यासुप्तानि सत्वरम् । शौरिर्जागरयामास पाञ्चजन्यं प्रणादयन् ॥ २७ ॥

अन्वयः—शौरिः पांचजन्यं प्रणादयन् अस्त्र शय्या सुप्तानि अस्त्र अधिदैवतानि सत्वरं जागरयामास. ॥ २७ ॥

अर्थः—पछी ते विष्णुए ते पांचजन्य शंखने वगाडतां थकां शस्त्रोरूपी शय्यामां सुतेला शस्त्रोना अधिष्टायक देवोने एकदम जगाड्या.

तेन शङ्खस्य घोषेण सैन्यानि प्रतिशार्ङ्गिणः । तृणानि पवनेनेवोड्डाययामासिरेऽग्रतः ॥ २८ ॥

अन्वयः—शंखस्य तेन घोषेण प्रतिशार्ङ्गिणः सैन्यानि पवनेन तृणानि इव अग्रतः उड्डाययामासिरे ॥ २८ ॥

अर्थः—शंखना ते नादथी प्रतिवासुदेवनां सैन्यो, पवनथी घासनी पेठे अगाडीना भागमां उडवा लाग्यां. ॥ २८ ॥

संक्रुद्धस्तद्ध्वनेरब्दशब्दादिव मृगाधिपः । शैलशृङ्गमिवारोहद्रथं प्रतिरथाङ्गभृत् ॥ २९ ॥

अन्वयः—अब्द शब्दात् मृग अधिपः शैल शृंगं इव, तत् ध्वनेः संक्रुद्धः प्रतिरथांगभृत् रथं आरोहत्. ॥ २९ ॥

अर्थः—पछी मेघनी गर्जनाथी (क्रोध पामेलो) सिंह जेम पर्वतना शिखरपर चडे, तेम ते शंखना नादथी क्रोध पामेलो ते तारक प्रतिविष्णु पण रथपर चड्यो. ॥ २९ ॥

जयलक्ष्मीहठाकृष्टिसिद्धमन्त्राक्षरैरिव । सैन्यानि चापटङ्कारैः स्थिरयन्स हरिं ययौ ॥ ३० ॥

अन्वयः—जय लक्ष्मी हठ आकृष्टि सिद्ध मंत्र अक्षरैः इव, चाप टंकारैः सैन्यानि स्थिरयन् सः हरिं ययौ. ॥ ३० ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः-पछी जयलक्ष्मीने बळात्कारे खेंची लावनारा सिद्ध मंत्राक्षरोसरखा धनुषना टंकारनादोथी (पोतानां) सैन्योने स्थिर करतो थको ते प्रतिवासुदेव वासुदेवनी सामे गयो. ॥ ३० ॥

**क्रुद्धौ दृग्युद्धवाग्युद्धपूर्वं सर्वायुधैः क्रमात् । परस्परेण संरब्धौ प्रारब्धौ योद्धुमेव तौ ॥ ३१ ॥**

अन्वयः—क्रुद्धौ संरब्धौ तौ दृग्युद्ध वाग्युद्ध पूर्वं, क्रमात् सर्व आयुधैः परस्परेण योध्धुं एव प्रारब्धौ. ॥ ३१ ॥

अर्थ.—पछी क्रोध पामीने तैयार थयेला एवा तेओ बन्ने दृष्टियुद्ध, तथा वचनयुद्धपूर्वक अनुक्रमे सर्व शस्त्रोथी परस्पर युद्धज करवा लाग्या. ॥ ३१ ॥

**शिलीमुखा मिथश्छिन्नाः क्षोणीगतमुखास्तयोः । कबन्धैरिव पश्चार्धैर्ननृतुर्युद्धमूर्धनि ॥ ३२ ॥**

अन्वयः-मिथः छिन्नाः, क्षोणी गत मुखाः तयोः शिलीमुखाः कबंधैः इव पश्चार्धैः युद्ध मूर्धनि ननृतुः ॥ ३२ ॥

अर्थः-परस्पर कपाइ गयेलां, तथा जमीनमां खुंची गयेलां मुखोवाळां, तेओ बन्नेनां बाणो कबंधोनी पेठे (बहार रहेला) उपरना अर्ध भागोवडे युद्धना मस्तकपर (संग्रामना मेदानमां) नाचवा लाग्यां. ॥ ३२ ॥

**छिन्नमध्या अपि शरा बहुवेगबलोद्धताः । तयोर्लक्ष्यं ययुः केऽपि कोपना इव पन्नगाः ॥ ३३ ॥**

अन्वयः-छिन्न मध्याः अपि तयोः के अपि शराः, बहु वेगबल उद्धताः, कोपनाः पन्नगाः इव लक्ष्यं ययुः. ॥ ३३ ॥

अर्थः-छेदाइ गया छे मध्य भागो जेना, एवां पण तेओनां केटलांक बाणो, अति वेगथी उछळताथका क्रोध पामेला सर्पोनी पेठे



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

देखावा लाग्यां. (अथवा लक्ष्यमते जवा लाग्या.) ॥ ३३ ॥

**क्रुधारुणमुखौ श्यामौ बाणपञ्जरमध्यगौ । जग्मतुः केलिकीरत्वं वाग्मिनौ तौ जयश्रियः ॥ ३४ ॥**

अन्वयः-क्रोध अरुण मुखौ, श्यामौ, बाण पंजर मध्य गौ, वाग्मिनौ तौ जय श्रियः केलि कीरत्वं जग्मतुः ॥ ३४ ॥

अर्थः-क्रोधथी लाल मुखवाळा, श्याम कांतिवाळा, तथा बाणोरूपी पांजरांमां रहेला, अने वाचाल एवा तेओ बन्ने जयलक्ष्मीना क्रीडा करवाना शुकपणाने पाम्या. ॥ ३४ ॥

**तुल्योद्यमबलौ तुल्यकृतिप्रतिकृतिक्रमौ । तौ तुल्यलक्षणौ वीक्ष्य भग्नाशोऽभूत्पराजयः॥ ३५ ॥**

अन्वयः-तुल्य उद्यम बलौ, तुल्य कृति प्रतिकृति क्रमौ, तुल्य लक्षणौ तौ वीक्ष्य पराजयः भग्न आशः अभूत्. ॥ ३५ ॥

अर्थः-सरखा उद्यम अने बलवाळा, सरखां कार्य अने प्रतिकार्यना अनुक्रमवाळा, तथा सरखां लक्षणोवाळा तेओ बन्नेने जोइने पराजय तो निराश थइ गयो. ॥ ३५ ॥

**स्वयं जयश्रियैकैकबाहुनालिङ्गिताविव । केन केन महास्त्रेण चक्रतुर्विक्रमं न तौ ॥ ३६ ॥**

अन्वयः-जय श्रिया एक एक बाहुना आलिंगितौ इव, तौ केन केन महास्त्रेण विक्रमं न चक्रतुः. ॥ ३६ ॥

अर्थः—जयलक्ष्मीए (पोताना) एकेक हाथथी जाणे पकडेला होय नही! एवा तेओ बन्ने कयां कयां महान शस्त्रथी पोतानुं पराक्रम न फोरववा लाग्या? ॥ ३६ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

**अस्त्रान्तरेण मत्वाथ दुर्जयं विजयानुजम् । दुर्निरीक्षतरं चक्रे करं चक्रेण तारकः ॥ ३७ ॥**

अन्वयः–अथ अस्त्र अंतरेण विजय अनुजं दुर्जयं मत्वा तारकः चक्रेण करं दुर्निरीक्षतरं चक्रे. ॥ ३७ ॥

अर्थः–पछी बीजां शस्त्रोथी विजयना न्हाना भाइ द्विपृष्ठवासुदेवने दुर्जय मानीने ते तारकप्रतिवासुदेवे चक्रवडे करीने (पोताना) हाथने अति कष्टथी जोइ शकाय एवो कर्यो, ( अर्थात् हाथमां तेजस्वी चक्र धारण कर्युं.) ॥ ३७ ॥

**जीवितव्यमिवार्कस्य रहस्यमिव विद्युताम् । चक्रं चित्तमिवाग्नेस्तज्ज्वलत्कः प्रेक्ष्य नात्रसत् ॥ ३८ ॥**

अन्वयः–अर्कस्य जीवितव्यं इव, विद्युतां रहस्यं इव, अग्नेः चित्तं इव, तत् ज्वलत् चक्रं प्रेक्ष्य कः न अत्रसत्? ॥ ३८ ॥

अर्थः—सूर्यनां जीवनसरखां, विजळीओना सारसरखां, तथा अग्निना हृदयसरखां ते जाज्वल्यमान चक्रने जोइने कोण त्रास पाम्युं नही? ॥ ३८ ॥

**तादृक्प्रभावभृच्चक्रं न किंचिदिति चिन्तयन् । पीतवान्पीतवासास्तद्दृक्ताराकान्तिवारिदैः ॥ ३९ ॥**

अन्वयः—तादृक् प्रभाव भृत् चक्रं न किंचित्, इति चिंतयन् पीत वासाः दृक् तारा कांति वारिदैः तत् पीतवान्. ॥ ३९ ॥

अर्थः–तेवां माहात्म्यवाळुं आ चक्र तो कंइज वीसातमां नथी, एम चिंतवता ते पीतांबर ( वासुदेव पोतानी ) आंखोनी कीकीओनां तेजरूपी वादळांओवडे तेने पी गया. ॥ ३९ ॥

**चक्रेण जितमेवेति मन्यमानस्तु तारकः । तर्जयन्निव दृष्ट्यैव प्रहसन्हरिमाह सः ॥ ४० ॥**

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अन्वयः—चक्रेण जितं एव, इति मन्यमानः सः तारकः तु, दृष्टया एव तर्जयन् इव, महसन् हरिं आह. ॥ ४० ॥
अर्थः—आ चक्रथी मारी जीत थइज छे, एम मानतो ते तारक तो दृष्टिथीज जाणे तिरस्कार करतो होय नही! तेम हांसी करतो-थको विष्णुने कहेवा लाग्यो के, ॥ ४० ॥

**चिरसेवकसूनुर्मे दुर्मेधा इति वध्यसे । मदाज्ञां श्रय भो डिम्भ भुंक्ष्व भोगान्म्रियस्व मा ॥ ४१ ॥**

अन्वयः—मे चिर सेवक सूनुः दुर्मेधाः इति वध्यसे, भो डिंभ! मदाज्ञां श्रय? भोगान् भुंक्ष्व? मा म्रियस्व? ॥ ४१ ॥
अर्थः—मारा घणा काळना सेवकनो पुत्र थइने तुं दुर्बुद्धि निवडेलो छे, माटे तारो वध करवानो छे, माटे हे बभरु! (हजु पण) तुं मारी आज्ञा स्वीकार? अने भोगो भोगव? (नाहक) न मार्यो जा? ॥ ४१ ॥

**हरिराह त्वदस्त्राणां प्रमाणं ददृशे मया । मुञ्च चक्रमपीदानीं पश्याम्यस्याप्यहं महः ॥ ४२ ॥**

अन्वयः—हरिः आह, त्वद् अस्त्राणां प्रमाणं मया ददृशे, इदानीं चक्रं अपि मुंच? अस्य अपि महः अहं पश्यामि. ॥ ४२ ॥
अर्थः—त्यारे विष्णुए कह्युं के, तारां शस्त्रोनुं प्रमाण में जोयुं छे, हवे आ चक्रने पण मूक? के जेथी तेना तेजने (पण) हुं जोउं.

**इत्युक्त्वा कुपितश्चक्रं भ्रमयित्वा रयेण खे । तं प्रति त्रस्तचन्द्रार्कतारकं तारकोऽमुचत् ॥ ४३ ॥**

अन्वयः—इति उक्त्वा कुपितः तारकः त्रस्त चंद्र अर्क तारकं चक्रं रयेण खे भ्रमयित्वा तंप्रति अमुचत् ॥ ४३ ॥
अर्थः—एम कहेवाथी क्रोध पामेला ते तारके, चंद्र, सूर्य तथा ताराओने पण त्रास आपनारां ते चक्रने वेगथी आकाशमां भमा-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वीने तेनापर मूक्यु. ॥ ४३ ॥

स्नेहाज्जयश्रिया कर्णकुण्डलेनेव केशवः । नाभ्या हृदि हतस्तेन चक्रेण सुखमूर्छितः ॥ ४४ ॥

अन्वयः—जय श्रिया स्नेहात् कर्णकुंडलेन इव, तेन चक्रेण नाभ्या हृदि हतः केशवः सुख मूर्छितः. ॥ ४४ ॥

अर्थः—जयलक्ष्मीए स्नेहथी जाणे कर्णना कुंडलसरखा ते चक्रे धरीवडे छातीमां हणेला ते विष्णु सुखमूर्छा पाम्या. ॥ ४४ ॥

अतिज्वलयतेवाथ तत्प्रतापहुताशनम् । वीजितो व्यजनीकृत्य वासोऽन्तं विजयेन सः ॥ ४५ ॥

अन्वयः—अथ तत् प्रताप हुताशनं अतिज्वलयता इव, विजयेन वासः अंतं व्यजनीकृत्य सः वीजितः. ॥ ४५ ॥

अर्थः—पछी ते विष्णुना प्रतापरूपी अग्निने जाणे अत्यंत जाज्वल्यमान करता होय नही! तेम विजयबलदेवे वस्त्रना छेडाने वींझणारूप करीने तेने पवन नाख्यो. ॥ ४५ ॥

तदेव चक्रमुद्भ्रम्य मूर्छान्ते तं हरिर्जगौ । मुञ्चाग्रभागं मुञ्चामि जीवन्तं भुंक्ष्व भो भुवम् ॥ ४६ ॥

अन्वयः—मूर्छा अंते तत् एव चक्रं उद्भ्रम्य हरिः तं जगौ, भोः अग्र भागं मुंच? जीवंतं मुंचामि, भुवं भुंक्ष्व? ॥ ४६ ॥

अर्थः—पछी मूर्छाने अंते तेज चक्रने भमावीने विष्णुए तारकने कह्युं के, अरे! तुं (मारी) आगळथी खसी जा? तने जीवतो मूकुं छुं, माटे पृथ्वी (तारुं राज्य) भोगव? ॥ ४६ ॥

क्रुधा रक्तभ्रमच्चक्षुस्तारकस्ततः । ऊचे तं दन्तपेषोत्थस्फुलिङ्गावलिनीं गिरम् ॥४७॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अन्वयः—ततः क्रुधा रक्त भ्रमत् चक्षुः तारकः तारकः तं दंत पेष उत्थ स्फुलिंग आवलिनीं गिरं ऊचे. ॥ ४७ ॥

अर्थः—पछी क्रोधथी लाल थयेली आंखोमां भमती कीकीओवाळो ते तारकप्रतिवासुदेव तेनाप्रते दांतो कचकचाववाथी उत्पन्न थयेला तणखाओनी श्रेणिसरखी वाणी बोलवा लाग्यो के, ॥ ४७ ॥

**अरे रे मुञ्च मुञ्च द्राग्ममैवेदमनेन हि। हस्तात्तेन पुनर्यत्नान्मुक्तेन त्वच्छिरो हरे ॥ ४८ ॥**

अन्वयः—अरेरे! द्राग् मम एव इदं मुंच मुंच? हि पुनः हस्त आत्तेन यत्नात् मुक्तेन अनेन त्वत् शिरः हरे. ॥ ४८ ॥

अर्थः—अरेरे! (तुं) तुरत मारापरज ते चक्र मूक? मूक? केमके फरीने हाथमां लइ चींधीने मूकेलां एज चक्रथी तारां मस्तकनुं हुं हरण करुं. ॥ ४८ ॥

**इति वाचार्दितः शार्ङ्गी चक्रमुद्भ्रम्य मूर्धनि। द्रागमुञ्चत तच्छिन्नमपश्यच्च द्विषच्छिरः ॥ ४९ ॥**

अन्वयः—इति वाचा अर्दितः शार्ङ्गी चक्रं मूर्धनि उद्भ्रम्य द्राग् अमुंचत, च तत् छिन्नं द्विषत् शिरः अपश्यत्. ॥ ४९ ॥

अर्थः—ए रीतनां वचनथी पीडित थयेला विष्णुए ते चक्रने मस्तकपर भमावीने तुरत मूक्युं, अने तेथी छेदायेलां शत्रुनां मस्तकने तेणे जोयुं. ॥ ४९ ॥

**चिरं प्रतिहरिः प्रीतः संभुज्य विजयश्रियम् ॥ सुष्वाप वीरशय्यायां यशश्रीरावगुण्ठनः ॥ ५० ॥**

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

अन्वयः-चिरं विजय श्रियं संभुज्य प्रीतः प्रतिहरिः, यशः चीर अवगुंठनः वीर शय्यायां सुष्वाप. ॥ ५० ॥

अर्थः—( एरीते ) घणा काळसुधी जयलक्ष्मीने भोगवीने खुशी थयेलो ते प्रतिवासुदेव, यशरूपी वस्त्र ओढीने शूरवीरोनी शय्यामां सूतो. ॥ ५० ॥

**स्वनामशत्रुसंहारसंप्रीतैरिव तारकैः । पुष्पवृष्टिश्रियागामि विष्णुं सेवितुमम्बरात् ॥ ५१ ॥**

अन्वयः-स्व नाम शत्रु संहार संप्रीतैः तारकैः इव, अंबरात् पुष्प वृष्टि श्रिया विष्णुं सेवितुं आगामि. ॥ ५१ ॥

अर्थः-पोताना नामवाळा शत्रुना विनाशथी खुशी थयेला जाणे ताराओ आव्या होय नही! तेम आकाशमांथी पुष्पवृष्टिनी लक्ष्मी विष्णुनी सेवा करवाने आवी. ॥ ५१ ॥

**जिगाय गायनोद्गीतगुणग्रामो रणं हरिः । स केन जीयतां यस्यानुयायी विजयः स्वयम् ॥ ५२ ॥**

अन्वयः—गायन उद्गीत गुण ग्रामः हरिः रणं जिगाय, स्वयं विजयः यस्य अनुयायी, सः केन जीयतां? ॥ ५२ ॥

अर्थः—गीतोथी गवायेला छे गुणग्रामो जेना, एवा ते विष्णुए रणसंग्राममां विजय मेळव्यो, विजय ( बलदेव ) पोते जेना अनुयायी छे, ते विष्णुने कोण जीती शके? ॥ ५२ ॥

**चक्रं च राजचक्रं च तारकस्य तदद्भुतम् । लग्नं हस्ते च पादे च किं करोमीति शार्ङ्गिणः ॥ ५३ ॥**

अन्वयः-तारकस्य चक्रं च राजचक्रं च, किं करोमि? इति शार्ङ्गिणः हस्ते च पादे च लग्नं, तद् अद्भुतं. ॥ ५३ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—ते तारकनुं चक्र, अने राजाओनो समूह, हवे हुं शुं करुं? एम विचारता विष्णुना हाथमां अने पगमां आवी पड्यां, ए आश्चर्य छे! ॥ ५३ ॥

**भरतार्धजयारम्भससंरम्भहृदो हरेः । चक्रमेवाभवज्जेयदेशमार्गोपदेशकम् ॥ ५४ ॥**

अन्वयः-भरत अर्ध जय आरंभ ससंरंभ हृदः हरेः, चक्रं एव जेय देश मार्ग उपदेशकं अभवत्. ॥ ५४ ॥

अर्थः-अर्ध भरतना विजयना आरंभनी उत्सुकतावाळुं छे हृदय जेनुं, एवा ते विष्णुने ते चक्रज जीतवाना देशोनो मार्ग देखाडनारुं थयुं. ॥ ५४ ॥

**दक्षिणं भरतार्धं स सार्धं सर्वैर्धराधवैः । तयैव यात्रया जैत्रः साधयामास माधवः ॥ ५५ ॥**

अन्वयः-जैत्रः सः माधवः तया एव यात्रया सर्वैः धरा धवैः सार्धं दक्षिणं भरत अर्धं साधयामास. ॥ ५५ ॥

अर्थः-विजय पामेला ते विष्णुए तेज प्रयाणथी सर्व राजाओनी साथे दक्षिण भरतार्धने जीती लीधो. ॥ ५५ ॥

**जनवन्मागधाधीशं वरदामेश्वरं च सः । प्रभासप्रभुमप्येतान्देवान्सेवागिरोऽकरोत् ॥ ५६ ॥**

अन्वयः-च सः मागध अधीशं, च वरदाम ईश्वरं, प्रभास प्रभुं अपि, एतान् देवान् जनवत् सेवा गिरः अकरोत्. ॥ ५६ ॥

अर्थः-पछी तेणे मागधतीर्थना स्वामीने, तथा वरदामतीर्थना स्वामीने, अने प्रभासतीर्थना स्वामीने, एम ते देवोने पण माणसनीपेठे सेवानां वचनो बोलनारा कर्या, (अर्थात् तेओने पोताना सेवको कर्या.) ॥ ५६ ॥

आगमन्मगधान्यात्राविनिवृत्तोऽच्युतस्ततः । तत्र व्यलोकयत्कोटिनरोत्पाट्यां महाशिलाम् ॥ ५७ ॥

अन्वयः–ततः यात्रा विनिवृत्तः अच्युतः मगधान् आगमत्, तत्र कोटि नर उत्पाट्यां महाशिलां व्यलोकयत्. ॥ ५७ ॥

अर्थः—पछी ते प्रयाणयात्राथी पाछा फरेला विष्णु मगधदेशमां आव्या, अने त्यां तेमणे क्रोड माणसो उपाडे एवी ( एक ) म्होटी शीला जोइ. ॥ ५७ ॥

दूरावलोककुतुको नरः करमिवाच्युतः । लीलयोत्पाटयामास तां ललाटतटावधि ॥ ५८ ॥

अन्वयः—दूर अवलोक कुतुकी नरः करं इव, अच्युतः, तां ललाट तट अवधि लीलया उत्पाटयामास. ॥ ५८ ॥

अर्थः–दूर जोवानी इच्छावाळो मनुष्य जेम (पोतानो)हाथ ललाटने अडाडे छे, तेम ते विष्णुए ते शीलाने छेक पोताना ललाट-सुधी क्रीडामात्रमांज उपाडी. ॥ ५८ ॥

स्थापयित्वा यथास्थानं तामथाङ्गरथाङ्गभृत् । उत्तोरणपुरागारद्वारिकां द्वारिकां ययौ ॥ ५९ ॥

अन्वयः—अथ अंग तां यथास्थानं स्थापयित्वा रथांगभृत् उत्तोरण पुर आगार द्वारिकां द्वारिकां ययौ. ॥ ५९ ॥

अर्थः–पछी आनंदथी ते शिलाने तेनां योग्य स्थानके पाछी मूकीने ते विष्णु नगरनां घरोना दरवाजाओपर ज्यां तोरणो लटकावेलां छे, एवी द्वारिकानगरीमां गया. ॥ ५९ ॥

हरिः सिंहासनेऽध्यास्य जनकेनाग्रजेन च । सर्वैरुर्वीधवैश्चार्धचक्रित्वे सोऽभ्यषिच्यत ॥ ६० ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अन्वयः—जनकेन च अग्रजेन, च सर्वैः उर्वीधवैः सिंहासने अध्यास्य सः अर्धचक्रित्वे अभ्यषिच्यत. ॥ ६३ ॥

अर्थः–पछी पिताए, म्होटा भाइए (बलदेवे) तथा सर्व राजाओए मळीने, सिंहासनपर बेसाडीने ते विष्णुनो अर्धचक्रीपणानी राज्यगादीपर अभिषेक कर्यो. ॥ ६३ ॥

नीतिं वितत्य पृथ्वीं स पृथ्वीं पृथ्वीपुरन्दरः । अपालयद्वनीपाल इव बालद्रुमावलीम् ॥ ६४ ॥

अन्वयः—वनीपालः बाल द्रुम आवलीं इव सः पृथ्वीपुरंदरः पृथ्वीं नीतिं वितत्य पृथ्वीं अपालयत्. ॥ ६४ ॥

अर्थः–बगीचानो रक्षक माली जेम वृक्षोनां छोडवाओनी श्रेणितुं रक्षण करे छे, तेम ते पृथ्वीन्द्रे विशाल नीतिनो विस्तार करीने पृथ्वीनुं रक्षण कर्युं. ॥ ६४ ॥

॥ इति श्री द्विपृष्टवासुदेवचरित्रं समाप्तं ॥ आ चरित्र श्रीवासुपूज्यचरित्र नामनामहाकाव्यमांथी स्वपरना श्रेयने माटे तेना अन्वय तथा गुजरातो भाषांतर करो जामनगर निवासी पंडितश्रावक हीरालाल हंसराजे पोताना श्रीजैनभास्करोदय प्रीन्टींग प्रेसमां छापी प्रसिद्ध कर्युं छे ॥ श्रीरस्तु ॥

॥ समाप्तोऽयं ग्रंथो गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ इति श्रीद्विपृष्ठवासुदेव चरित्रं समाप्तम् ॥

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust